Vol. - V
ISBN - 2347 - 629X

वाग् वै ब्रह्म

# गोणिका

(व्याकरणशास्त्रीयवार्षिकशोधपत्रिका)

शिक्षासत्रम् - २०१७-१८

संरक्षकः

**प्रो. अतुलकुमारनन्दः**

प्राचार्यः

प्रधानसम्पादकः

**प्रो. हरेकृष्णमहापात्रः**

विभागाध्यक्षः

नव्यव्यकरणविभागः

**राष्ट्रियसंस्कृतसंस्थानम्** (मानितविश्वविद्यालयः)

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "ए" श्रेण्यां प्रत्यायितम्)

श्रीसदाशिवपरिसरः, पुरी, ओडिशा

गोणिका - २०१७-१८
Vol. - V

वाग् वै ब्रह्म

# गोणिका

(अधिकारविशेषाङ्कः)

शिक्षासत्रम् - २०१७-१८

❖

**संरक्षकः**

## प्रो. अतुलकुमारनन्दः

प्राचार्यः

❖

**प्रधानसम्पादकः**

## प्रो. हरेकृष्णमहापात्रः

विभागाध्यक्षः

❖

**सम्पादकाः**

| | |
|---|---|
| प्रो.के.वी.सोमयाजुलुः | प्रो. अनुपमापृष्टिः |
| डॉ. दुर्गाचरणषडङ्गी | डॉ. उमेशचन्द्रमिश्रः |
| डॉ.अजयकुमारदाशः | श्री अजयानन्दसाहुः |

**नव्यव्याकरणविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्** (मानितविश्वविद्यालयः)

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ‘ए’श्रेण्यां प्रत्यायितम्)

श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# गोणिका (GONIKA)

**प्रकाशक**: - नव्यव्याकरणविभागः
श्रीसदाशिवपरिसरः, पुरी (ओडिशा)

**वर्षम्** - २०१८

© **सर्वस्वत्वसंरक्षणम्** - नव्यव्याकरणविभागः, श्रीसदाशिवपरिसरः, पुरी

**ISSN - 2347-629X**

**Vol.- V**

**Email - gonika2013@gmail.com**

**संस्करणम्** - २०१८

**प्रतयः** - ३००

**अक्षरसंयोजनम्** - **डॉ.अजयकुमारदाशः**
**श्रीअजयानन्दसाहुः**

**मुद्रकः** - **सारथिप्रिण्टर्स्**
**मोचिसाहि, पुरी - १**

**मूल्यम्** - २००/-

# प्राचार्यवाक्



"मानाधीना मेयसिद्धि:" इत्यभियुक्तोक्ते: प्रमाणप्रयोजनं सर्वातिशायि वर्त्तते । तत्र च प्रमाणपदवाच्येषु प्रत्यक्षादिषु शब्दप्रमाणस्य स्थानं सर्वोत्कृष्टं वरीवर्त्ति । अत एव भगवान् महाभाष्यकार: - **"शब्दप्रमाणका: वयम् । यच्छब्द आह तदस्माकं प्रमाणम्"** इति निगदन् शब्दप्रमाणं विशिनष्टि । अत्र शब्दपदेन मुख्यत: शास्त्रावयवीभूत: शब्दसमुदाय एव ग्राह्य: । तत्तच्छास्त्रञ्च वेदमेवोपजीव्यानुशासनकर्तृत्वं दधाति । तदुक्तमाचार्येण भर्त्तृहरिणा -

**"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजना: ।**
**तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भि: प्रकल्पिता: ।।"** (वाक्यपदीयम् -१/७)

तेषु च शास्त्रसञ्चयेषु सकलस्यापि शास्त्रस्य प्रयोजनवत्त्वाभिगमेऽपि तत्र शब्दानुशासनापरपर्यायस्य व्याकरणशास्त्रस्य प्रयोजनं निर्विवादं सर्वोपकारकञ्च । व्याकरणमेव वाचस्संस्कारेण मनीषिणं सुसंस्कृतं सम्पादयत्तं विभूषितं विधत्ते । अत: कविकुलगुरु: कालिदास: पार्वत्या: जननेन हिमालयस्य शोभां वर्णयितुकामो मालोपमया तां व्यक्तीकुर्वन् चरमेणोपमानेनेदमेव संस्मारयति । तथाहि -

**"प्रभामहत्या शिखयेव दीप:**
**त्रिमार्गयेव त्रिदिवस्य मार्ग: ।**
**संस्कारवत्येव गिरा मनीषी**
**तया स पूतश्च विभूषितश्च ।।"** (कुमारसम्भवम् -१)

अत एव वाक्यपदीयकार: -

**"तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।"** (वाक्यपदीयम् -१/१४)

इति ब्रुवाणो व्याकरणस्य सर्वविद्यावरीयस्त्वं विशदयति । किञ्च व्याकरणज्ञानेन भाषापाटवं सम्प्राप्य यथा जनो व्यवहारनैपुण्यं लभते तथैव शास्त्रान्तरप्रवेशार्थं वैशद्यमपि समासादयति । अत: सिद्धिसोपानपर्वणामाद्यपदस्थानत्वेन व्याकरणस्य निर्देशस्संगच्छते । अत: अस्यामेव परम्परायां शब्दशास्त्रस्य प्रवहन्तीं महतीं प्रतिष्ठां संस्थापयिष्यन्नस्मत्परिसरस्य व्याकरणविभागो **"गोणिका"** नाम्नीं गुणिगणगणनीयां पत्रिकां परिप्रकाशयति । एषा पत्रिका छात्राणां लेखप्रकाशनेन यथा तां समुत्साहयति तथैव विद्वद्वरिष्ठानां प्रबन्धोपस्थापनेन तेषां शेमुषीमपि विशेषयति । तस्माद् भगवतो नीलाद्रीशस्य परमानुकम्पया गोणिकेयं द्युमणिरिव सर्वत्र परिगण्यतामित्याशासानो विरमत्येष जन: ।

**(प्रो.अतुलकुमारनन्द:)**
**प्राचार्य:**

# सम्पादकीयम्

शब्दब्रह्मणि निष्णात: परब्रह्माधिगच्छतीत्याचार्यवचनं उद्बोधयति यच्छब्दज्ञानमन्तरा परब्रह्मणि सायुज्यं न । शब्दज्ञानं व्याकरणज्ञानाधीनम् । अत: कैयट: प्रत्यपादयत् "अर्थपरिज्ञानफला हि वाक् । सम्यक् ज्ञानं हि प्रकाशनमर्थस्य । अर्थो हि वाच: शरीरम्" इति कैयट: अर्थशरीराया: वाच: आत्मत्वेन शब्दं निरदिशत् । आत्मरहितशरीरस्य जडत्वमिव शब्दतत्त्वं विना अर्थरूप: एष सर्वोऽपि दृश्यादृश्यप्रपञ्च: निस्सार एव इत्यस्ति तदभिप्राय: । तच्च शब्दतत्त्वमेकमखण्डमनन्तञ्च । तत् सर्वै: प्रतिदिनमुपयुज्यमानं गृह्यमाणं विचार्यमाणमपि समुद्र इव अविनाशि अक्षीणं नित्यनवनवायमानं चास्ति । तदुक्तम् -



**" वाग्वै समुद्रो न वै वाक् क्षीयते समुद्र: ।"** (ऐ.५/१६)

**" वाग्वै विराट् ।"** (शत. ३/५/१/३४)

**" वाग्वै सम्राट् परमं ब्रह्म ।"** (बृ.उ.४/१)

समग्रस्यापि विश्वस्य वागेव शक्तिरिति उपनिषद: प्राहु: । विद्युत: विद्योतनं वायो: वानं मेघस्य बर्षणं च सर्वमपि वाक्शक्त्यैव क्रोडीकृतमिति तासामनुशंसनम् ।

**यद् विद्योतते यद् विधुनुते तत् स्तनयति ।**
**यन्मेहति तद् वर्षति वागेवास्य वाक् ।।** (बृहदा.उप.१/१)

अत: तेनैव पथा प्रचरन्त: शाब्दिका अपि -

**शब्देष्वेवाश्रिता शक्ति: विश्वस्यास्य निबन्धिनी ।**
**यन्नेत्र: प्रतिभाऽऽयं भेदरूप: प्रतीयते ।।** (वा.प.१/११९)

इति निगदन्त: शब्देष्वेव विश्वस्य निबन्धिनीं शाक्तिमदर्शन् तेभ्य: तामचैषु: तथोपादिक्षन् च । तच्च समुद्ररूपं परिव्यापकं वाक्तत्त्वमुपगन्तुं नेत्रमन्तर्मन एवेति साक्षात्कृतधर्माणामृषीणां संदिदिक्षा -

**"वाग्वै समुद्रो मन: समुद्रस्य चक्षु: ।"** (ताण्ड्य.ब्रा.६/४/७)

अविच्छिन्नमननापरपर्यायेण उपासनेन चोन्मीलति हृत्केदारे तदेव वाक्प्रसूनमिति तेषामाशय: । अत: परिसरस्य व्याकरणविभागीयविद्वांस: अन्तेवासिनश्च शब्दविद्यां यथा श्रवणमनननिदिध्यासव: सम्पद्येरन् तदर्थं विभागीया वार्षिकपत्रिका **"गोणिका"** कारकविशेषाङ्करूपेण गुणवतां पुरत: आत्मानं प्रस्तोतुं समीहते । भगवतो गोणिकापुत्रस्य पतञ्जले: परमानुकम्पया एषा गुणमयी गुणिगणस्वान्त:-सन्तोषिणी च परिगण्यतामिति श्रीजगन्नाथं नाथमानो प्रेक्षावत्पथमाश्रये । इति ।

**विदुषां विधेय:**

महापात्र:

**(प्रो. हरेकृष्णमहापात्र:)**

**विभागाध्यक्ष:**

# व्याकरणस्रष्टारः



सूत्रकार: भगवान् पाणिनि:



वार्तिककार: भगवान् कात्यायन:



महाभाष्यकार: भगवान् पतञ्जलि:

# विभागीयसदस्याः



**प्रो.हरेकृष्णमहापात्रः**
आचार्यःविभागमुख्यश्च



**प्रो.के.वि.सोमयाजुलुः**
आचार्यः



**प्रो.अनुपमापृष्टिः**
आचार्या



**डॉ.दुर्गाचरणषडङ्गी**
सहायकाचार्यः



**डॉ.उमेशचन्द्रमिश्रः**
सहायकाचार्यः



**डॉ.अजयकुमारदाशः**
अतिथिप्राध्यापकः



**श्री अजयानन्दसाहुः**
अतिथिप्राध्यापकः

# विभागीयकार्यक्रमचित्राणि








# विभागीयकार्यक्रमचित्राणि









# सूचीपत्रम्


| | लेख: | लेखक: | पत्रसंख्या |
|---|---|---|---|
| १. | THE ADHIKÂRA – DEVICE IN PÂNINI | Prof. A.C.Sarangi | १ |
| २. | अनुपसर्जनात् इत्यधिकारसूत्रार्थपरिशोधनम् | डॉ. कोडुकुलवेङ्कटसोमयाजुलु: | ९ |
| ३ | धातो: | प्रो. अनुपमा पृष्टि: | १५ |
| ४. | आकडारोदका संज्ञा | डॉ. सीमाचलपण्डा | १८ |
| ५. | स्त्रियामित्यधिकारसूत्रविमर्श: | डॉ. पूर्णचन्द्रपाढी | २१ |
| ६. | अनभिहितसूत्रानुशीलनम् | डॉ. युधिष्ठिरसाहु: | २५ |
| ७. | असिद्धवदात्राभात् इत्यधिकारसूत्रविमर्श: | डॉ. हरेकृष्णपट्टजोषी | २९ |
| ८. | कृत्यधिकारसूत्रस्वरूपम् | डॉ. शङ्कर्षण पण्डा | ४३ |
| ९. | अधिकारस्वरूपमीमांसा | डॉ. प्रियव्रतमिश्र: | ४६ |
| १०. | अधिकारसूत्रेषु ''स्त्रियाम्'' - एकमालोचनम् | डॉ. प्रशान्तकुमारमहला | ५० |
| ११. | कारके | डॉ.सुरेश कुमार जेना | ५६ |
| १२. | एक: पूर्वपरयो:(६-१-८४)इत्यधिकारसूत्रोपवृंहणम् | डॉ.सुबलचन्द्रसाहु: | ६० |
| १३. | पाणिनीयाधिकारसूत्राणां संघटनकौशलम् | डॉ.सुरजित् सामन्त: | ६७ |
| १२. | सिद्धान्तकौमुदीदिशा अनुपसर्जनादिति सूत्रार्थविचार:(४.१.१४) | सुस्मन्तकुमारद्विवेदी | ७० |

# THE ADHIKÂRA – DEVICE IN PÂNINI

**Prof. A.C.Sarangi**

## 1. Pânini and his Methodology

Pânini's(P's) Astâdhyaî (A°þ) is not only unique as faithful record of linguistic informations, however valuable from the point of linguistic criticism of the Sanskrit language may be, "but in its fitness as a training for our understanding the Indian methods of composition and specially as a scientific work it offers in this respect great advantages" .[1] P has composed his A°þ in Sitra style[2] keeping conformity with the fashion of his age when this particular style as well as various conventions utilized by P were adopted for many a philosophical and liturgical text.

1.1. As V.N. Mishra states, "Pânini's style is still more specialized than that of the other treatises, as it is not a chain of logical arguments and counter arguments but a full description of an organized mass of concrete data from a living speech(in other words, it is an abstraction in scientific and not philosophical terms").[2] In composing the A°þ, P follows a clear-cut dichotomy dividing the text into main divisions i.e., siddha and asiddha4. Again the two-fold classification of the A°þ may be considered on the basis of nature of rules, i.e., (i) Rules of prescription (vidhi-rules) pertaining to phonology, morphology ans syntax (ii) Rules of technical description, which include samjna paribhasa and adhikara-rules governing the interpretation, and application of vidhi-rules. Further division of rules into utsarga and apavada or antaranga and bahiranga or anitya reveals the ingenious interpretations of the later grammarians.[5]

## 2. Panini and his mnemotechniques

What strikes us most in P's Ast is his use of mnemotechnical means such as the use of adhikaras, and the anuvrlll procedure besides the most unique algebraic anubandha-system. Behind his primary principle of his technique of camposition lies his main purpose of achieving the economy, true to the sutra-style of his work. Yet P is blamed 'for having sacrificed system for the sake of style'. Some Western linguists including Whitney and Colebrooke have quite disapproved of "the highly artful and difficult from of about four thousand algebric formula-like rules in the statement and arrangement of which brevity alone is had in view at the cost of distinctness and unambiguousness"[6]. However, another Western grammarian, Barend Faddegon has adored P for his form of description "of which the algebraic anubandha system and further mnemotechnical means such as the use of adhikaras and in general of anuvritti in a continous series of sutras form characteristics features".[7]

2.1 Besides the siddha/asiddha technique, P has followed various popular conventions in the composition of the Ast. Although P does not always explicitly explain these conventions, he must have kept them in the background and those most have been very well understood by the students of grammar in those days. Although many such interpretative conventions have been discovered by later paniniyas such technical principles followed by P can be distinctly traced from the very style of phrasing the rules in the Ast. In case of conflict in applying rules by strictly following the para-principle by way of ordering the rules (only with the exceptions of "associative digression") P has been able to achieve the desired economy[8]. Like the ordering-princple, P has also followed a principle of grouping the rules, thus with a governing rule heading a particular group or subgroup. These section-heading rules are called adhikara-rules technically. If all the technical rules are called adhikara-rules technically. If all the technical rules will fall into a broad division of two categories, the first group of rules being the samjna and paribhasa-rules put together in the first two chapters of the Ast apply equally to all sections whereas the second group of rules i.e.,the section-heading rules apply only to a particular section. These technical rules, however are not independent rules like vidhi-rules but are the only helping rules to make the vidhi-rules adequate for a better understanding.

**3. Panini and paniniyas on the Features of Adhikara**

3.1. P has used various theoretical terms which he has borrowed from other treatises as well as from common usage and hence he has not defined or explained them. Such terms are either semantic, ritual, phonological or pertaining to spatial relations or to application of grammatical rules. The terms referring to the form and application of grammatical rules. The terms referring to the form and applicatin of grammatical rules include paribhasa 'metarules helping interpretation', vidhi 'prescriptive rule', prakrti 'basic form', vipratisedha 'conflict', anabhihito 'not expressed' and adhikara 'section-heading'. Kiparsky[9] calls them metagrammatical "in the sense that they refer not to concepts about which grammatical analysis must theorise, but to the basic equipment which one brings to the very task of grammatical analysis". These terms including adhikara are the common peoperty of the sutra-technique not only applied in grammar but in ritual and elsewhere.

3.2 P as well as katyayana (kty) do not explain the word adhikara, but Patanjali (Ptj) and later grammarians go on analysing the term. Except the sutra: svaritenadhikarah (P. 1. 3. 11) where P simply says that an adhikara - term is marked with svarita accent he does nowhere mention this again. Kty, however, has referred to this about fifteen times, where he has utilised this adhikara as a procedure. It is

only Ptj and later grammarians who have explained the term and utilised this often as a grammatical device in the matter of understanding P's intention. However, it is evident from the references found in the Mahabhasya (M) that even Kty and Ptj have neither understood correctly7 the term not its applicability so as to exactly read the mind of P.

3.3 Ptj tries to interpret the term on the basis of his common knowledge based on the polular ispeech. The meaning as well as the function is explained by Ptj through two statement (i) adhikrto'sau grame 'he is governing the village' or (ii) adhikrto'- sau nagare 'he is governing the town'. From this it means that adhikara for Ptj stands for 'governing'. Regrading the function of this adhikara Ptj states that the adhikara-element (marked by the extra svarita accent) is to be carried over (anuvitta) in each following rule and here in this explanation he quite agrees with Kty who says that an adhikara is meant for the non-mention of the adhikara-element in each following rule.[10] While justifying an ther purpose for the paribhasa-sutra, svaritenadhikarah be contitued again in case blocked by any other incompatible item. This as well as the preceding explanation of Kty and Ptj suggest tha both are not sure about P's intention and they confuse between adhikara and anuvrtti.[12]

Towards the end of the M on P. 1.3.11, Ptj interprets adhikara as adhikah karah ('extra function') and according to him any adhikara-element will have some additional meaning. For example he refers ot apaya in dhruvam apaye apadanam (P.1.4.24) and states that the word apaya with svarita accent might mean the mental separation besides its literal meaning 'physical separation' and hence he can justify the ablative usage in sentences like samkasyakebhyah pataliputraka abhirupatarah 'the inhabitants of Pataliputra are worthier than the inhabitants of Samkasya'. With the help of this interpretation, Ptj tries to justify the cases of purvavipratisedha which are contrary to P's orginal intention stated n his sutra, vipratisedhe paramkaryam (P.1.4.2), Although these forced explanations pass out under standing, the interpretation of adhikara as ashikah karah saeems to be the closest with the original idea behind P in his sutra svaritenadhikarah (P.1.3.1). This might suggest further that for P the adhikara-element with additional force was meant to be understood for particular group ofrules and most probaly for P too another procedure called anuvrtti was not necessary and so he has not stated anything about that.

3.4. However, it may be noted further that P does not explicitly state about the nature of the svarita-accented adhikara-element in a sutra. Neither he says whic vowel in the word should be marked svarita nor he says if the whole sutra is to be understood as adhikara and not a particular word-element. Ptj, at times, remarks, on the item fits to be carried over in the following rules as svaryate or svarayitavyam.

This shows tha ptj's text of Ast was an unaccented text. He even doubts P's sutra, samarthah padavidhih (P.2.1.1) as to the nature, whether it is an adhikiara or paribhasa. This doubt would not have been raised if the text of Ast, available to Ptj was an accented one. In the absence of an accented text, Ptj was an accented one. In the absence of an accented text, ptj takes resources to vyukhyana i.e., traditional interpretation as the last resort.[14] The Kasikakara as well as the later grammarians leave the problem of adding the extra svarita accent on the adhikara item to be decided by the enterpretative convention [15] which appears to be a free license in the hands of the unseasoned beginners of Sanskrit Grammar.

3.5. The Kasika-Vrtti explains adhikarah as viniyogah 'commissioned'. It interpretes the sutra, svaritenadhikarah (p.1.3.11.) as fillows: adhikaro viniyogh, svaritagunayuktam sabdasvarupam adhikrtatvad uttaratropatisthate 'the word marked with svarita accent is commissioned to present itself in the following rules. This is in no way different from Ptj's explanation only with the difference in the use of a simpler style. Bhattoji in his sabdakaustubha (on p.1.2.65) defines, adhikara as ekatropattasaya anyatravyaparah adhikarah i.e. a word (or a rule) in one place has its function elsewhere adhikara. This too corroborates our earlier view.

**4. Types of Adhikara**

4.1. Ptj in his M has referred to adhikara in three categories: located in one place yet elucidating the whole grammar, just as a bright lamp located in one place lights up the whole house. In this case there is no distinction between adhikara and paribhasa as both the rules are meant for the sake of other vidhi-rules and Kaiyata rightly comments on the M passage as adhikaro nametipararthyasamyat paribhasapy adhikara ucyate.[16]

4.2. Dragged along (anukrsta): In this category, an adhikara is like a piece of wood to which rope or iron has been fastened and is dragged along. In that way, what is dragged along with the particle ca even if blocked by incompatible items is called adhikara.[17] In this type no intermediary rule is left out. For instance, within the section anabhihite(starting from P.2.3.1) the word dvitiya (from p.2.3.2) is continued without the break upto P.2.3.5.

4.3. In the third type, the adhikara presents itself where needed from rule to rule. Only this type refers to the topic-wise segmentations of the Ast and where not necessary a few sutras may be skipped over like mandukapluti 'frog-jump' from a particular section headed by the adhikara-rule. For instance, the section heading anabhihite (P. 2.3.1) is discontinued in cases of P. 2.3.8, 16 and 32.18

4.4. Adhikara as stated earlier may be a govering rule consisting of one word (e.g., pratyayah (3.1.1), dhatoh (3.1.91) etc.) or many words (e.g., pragrisvaran

nipatah) (p.1.4.56), saha supa (p.2.1.4) and seso bahurihi(P.2.2.23) etc. The word characterised by the svarita accent is needed to be understood in each of the following sutra in order to avoid repetition.[19]

**5. The Scope and Extent of the Adhikara**

5.1. If Ptj's interpretation of the adhikara as adhikah karah is any clue to read the mind of P correctly, adhikara and anuvrtti will be synonymous. Although Ptj and later grammarians maintain a clea cut distinctio between these two, our hypothesis as stated for P might not suffer as the scope as well as purpose remains the same in as extended sense. Kty and Ptj agree with one another that the sutra svaritenadhikarah (P1.3.11) is required in order to know the extent of adhikara. Ptj interpretes the sutra (P.1.3.11) as svaritenadhikarah i.e, by seeing a svarita mark (i.e, on a new topic introducing sutra) the limit of the previous topic should be known. But in this case the beginning of the first topic cannot be known. Hence the other alternative is shought for if the domain has not been indicated by Prak or a.[20] Kty suggests in conclusion that for other adhikara-sutras without indicating the domain, the 'prak' should be added. Ptj, however, does not want to take liberty on P's sutras and he better feels comforted leaving the vexing issue to the traditional interpretation. This only suggests Ptj's helplessness, onve again proving the broken tradition in between P and Ptj. The goverance of sectionj headings is traditionally fixed in three ways : (i) generally by rarely by proceeding backward with lion's glance.proceeding ahead in subsequent rules like the stream of river, (ii) sometimes by jumps like of a frog omitting some rules and (iii) racely by proceeding backward with lion's glance.

5.2 Sometimes the extent of adhikara is within a pada or beyond a chapter. For instance, bhute (P3.2.84) is a section heading for the section P. 3.2.84-122 and pratyayah (P.3.1.1) covers the three following chapters of the Ast.

5.3 It has been stated earlier that P adopted this adhikaradevipe to understand the adhikara-extent. At times, one section includes various sub-sections with a heading rule for governing each sub-section. For instance, the ekasamjnadhikara (P.1.4.1- P.2.2.38) included ten sub sections headed by ten governing rules viz. karake (P.1.4.23-55), pragrisvaran nipatah (P.1.4.56-97), karmapravacaniyah (P.1.4.83-97) and prak kadarat samasah (P.2.1.3-P.2.2.38) etc. The extent of the adhikara is indicated in many P's sutras, However for other such sutras the limitatton is fixed by the later grammarians including Ptj but more specifically by the kasika-kara.

**6. The Utility of Adhikara**

6.1 S.D Joshi and Saroja Bhate in their valuable publication, The Fundamentals of Anuvrtti (1984) have discussed this from various angles.[22] They have rightly

commented that the device of adhikara is used to indicate homogeneity of topics and the adhikaras stand for a subject-wise division of contents of the Ast. The adhikara- device is adopted by P throughout the text of Ast as a general feature of organisation of the text. According to the critical edition of the kasika-vrtti[23] the Ast is divided into about forty topics.[24]

6.2 The adhikara- rules are introduced by P sometimes through samjna or sometimes through Paribhasa. Even at times the vidhi rules are introduced as adhikara (viz, pragdivyato'n)( P. 4.1.83) prak krstac chah (P.5.1.1 etc) Kty[25] suggests that technical terms should be introduced through adhikara-rules and thus supports P's rules like prak kadarat samasah (p.2.1.3), pragrisvaran nipatah(p. 1.4.56) karmapravacanlyah(p.1.4.83)etc.

6.3. An adhikara may represent a subject. For instance p frames the section heading rules like pratyayah(p.3.1.1), paras ca(p.3.1.2), adyudattas ca(p.3.1.3), samasah(p.2.1.3)etc.

6.4. Lexical environments are intoduced through adhikara: dhatoh(p.3.1.91) nyappratipadikat(p.4.1.1)etc.

6.5 Grammatical conventions are stated through sectionheadings: asiddhavat atrabhat(p.5.4.22), purvatrasiddham(p.8.2.1)etc.

6.6 Meaning-conditions are also expressed through adhikara: karake(p.1.4.23) anabhihite(p.2.3.1)etc.

6.7 A few theoretical concepts like anga, pada and samihita etc. are introduced through adhikara angasya (p.6.4.1), samhitayam(p.6.1.72) sese (p.4.2.92)etc.

These are some of the instances which are represented by adhikara. Thus p adopts this this adhikara. Thus p adopts this adhikara-device for achieving a number of benefits grammatically.

**8. Concluding Remarks**

1. Like many other devices adopted by p, the adhikara-device is utilised to achieve economy and this has been rightly acclaimed as a superb technique in his ingenious methodogy.

2. The metagrammatical theoretical terms used by p include adhikara which he has coined from his daily speech. These terms are the characteristic features of the sutra-technique.

3. Ptj's interpretation of adhikara as adhikah karah seems to be nearest to the original intention of p and hence it is likely, for p (and also for Kty) adhikara and anuvritti are synonymous. Initially by Ptj and later by others a distinction was maintained between the two. The anuvritti-procedure is adopted in two rules or in a small group of rules whereas adhikara represented the topic wise division of the

Ast.

4. The technical rules like samjna, paribhasa, and adhikara do not function independently but help in completing and interpreting the prescriptive rules.

5. Due to unavailability of the accented text of the Ast and also due to the broken tradition between P and ptj, the grammarians including Ptj are at a loss to interpret the sutra svaritenadhikarah(p.1.3.11) and go on suggesting alternatives till with frustration they decide to take recourse to vyakhyana.' interpretation which seems to be illogical.

6. Regarding the types of adhikara Ptj includes paribhasa also in adhikara. It is difficult to be at one with grammarians even up to Kaiyata in this interpretation.

7. The grammarians are not sure as to the domain of adhikara. They try to suggest various methods. Kty even prefers to change such section heading with the addition of the word prak but ptj does not agree to such meddlings in the text but rather prefers to be guided by vyakhayana, an ungrammatical principle.

8. The adhikara-device is introduced by P as a general feature of the organisation of the text and it stands for various purposes viz., to represent samjna, process, lexical environment, meaning condition, grammatical convention and a few basic theoretical cocepts.

## NOTES AND REFERENCE

1. Barend Faddegon, Studies on Panini's Grammar (Amstardam, 1936), 2nd reprint, 1963 p.48.

2. Cp. the oft-quoted definition of the sutra-style :
alpaksaram asandigdham saravad visvatomukham
astobjam anavadyanca sutram sutravido viduh.
"i.e one which is brief but unambiguous, concise but comprehensive, impersonal and objective".

3. Descriptive Technique of Panini (1966).

4. See P's sutra, purvatrasiddham, P. 8.2.1

5. Traditionally a six-fold classification of sutras has been popularised:
Samjna ca paribhasa ca vidhir niyama eva ca I
atideso' dhikaras ca sadvidham sutralaksanam II

6. W.D. Whitney, Grammar, p.xi.

7. Barend Faddegon, op. cit., p.4

8. Cp. P's sutra, vipratisedhe param karyam, P.1.4.1.

9. Paul Kiparsky, Panini as Variationist, University of Poona, (1980).

10. See Kty's first Varttika (Vt) on P. 1.3.11 : adhikarah pratiyogam tasyanirdesarthah.

11. See Kty's Vt. 3 on P 1.3.11 (and Ptj's comment on it) : anayanirdesastu nivartakas tasmat paribhasa.

12. The last interpretation of Kty and Ptj (see f.n.11) appears to explain adhikara as section-heading and the previous agrument (see.f.n.10) explains it as anuvrtti- procedure.

13. See (M. Kielhorn's cr. ed, Vol. I, p.359 line 4) on p.2.1.1 kim ayam adhikara ahosvit paribhasa but what type of rule is this adhikara or paribhasa.

14. Cp. the oft-quoted M line used as the first Paribhasa-sutra in the Paribhasundusekhara of Nagesa : vyakhyanato viasesapratipattih na hi sandehad alaksanam, the understanding of a particular thing is decided by vyakhyana 'traditional interpretation' and simply a doubt should not make a rule no-rule.

15. Cp. Kasika-Vrtti on P.1.3.11 : partijnasvaritah paniniyah.

16. See kaiyata's Pradipa on M. Vol.I p. 119, line 9-13.

17. See for details : S.D Joshi and Saroja Bhate, The Role of ca in the interpretation of the Astadhyayi, University of Poona (1983).

18. See M(Vol.I, p 119, lines 9-13) on P.1.1.49.

19. Cp Kaiyata's pradipa on P.1.3.11.

20. Cp. sutra like : pragrisvaran nipatah (P.1.4.56), prak kadarat samasah 1.4.1. (P.2.1.3), prag divyato'n (P.4.1.83), a kadarad eka samjna (P.1.4.1), a ca tvat (P. 1.5.120), asiddhavat atrabhat (P. 6.4.22).

21. Cp. the oft-quoted line :
simhavalokitam caiva mandukaplutameva ca I
gangapravahavaccapi adhikaras tridha matah II

22. op. cit., pp. 172-95.

23. Aryendra Sharma, ed., Sanskrit Academy, Osmania University, Hyderabad (1969),

24. Joshi and Bhate suggest about fifty topics.

25. Cf. Kty's Vt. I (M. Vol. 1. p. 37 line 25) : samjnaadhikarah samjnasampratyayarthah 'the section-heading samjna should be formed for clear understanding of the topic technical terms, However, in the next Vt, Kty suggests that topics could be established because of the Teacher's style (acaryacara) of phrasing the rules.

**Ex.Vice-Chancellor**
**SJSV, Puri (ODISHA)**

# अनुपसर्जनात् इत्यधिकारसूत्रार्थपरिशोधनम्

**डॉ. कोड्डुकुलवेङ्कटसोमयाजुलु:**

वेदाङ्गेषु षट्सु प्रधानं भवति व्याकरणम्। उक्तञ्च व्याकरणमहाभाष्ये[१] भगवता पतञ्जलिना - 'प्रधानञ्चषदस्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्न: फलवान् भवति' इति। इदञ्च व्याकरणं संस्कृतवाङ्मयस्थनिखिलवैदिकलौकिकसाधुशब्दान्वाख्यापकमाध्यमेन वेदोपकारकं भवति। इदञ्च व्याकरणमैन्द्रचान्द्रादिभेदेन नवविधञ्चकास्ति। नवविधात्मक-व्याकरणचये पाणिनीयं व्याकरणमन्यतमं राराजते।अद्यत्वे व्याकरणमधिजिगांसूनां तत्पिपाठयिषूणाञ्च पाणिनीयमेव महदुपकारकं विद्यते। तादृशपाणिनीयव्याकरणस्य सूत्रकर्ता भवति भगवान् पाणिनि:। तेन पाणिनियव्याकरणे सर्वप्रथमं ''अष्टाध्यायीनामक:'' कश्चन सूत्रग्रन्थ एकस्मिन् शुचाववकाशे प्रण्यनायि। ग्रन्थेऽस्मिन्नष्टावध्याया: प्रत्यध्यायञ्चत्वार: पादा:, ३८९१सूत्राणि च चकासति। सूत्राण्येतानि सर्वाण्यपि संज्ञा-परिभाषा-विधिनियमातिदेशाधिकारभेदेन षड्विधानि वर्तन्ते ।श्रूयते चाभाणक: -

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्चेति षड्विधं सूत्रलक्षणम् ।। इति।

वृद्धिरादैच्, अदेङ्गुण:,विरामोऽवसानमित्यादीनि संज्ञासूत्राणि इति नाम्ना, इकोगुणवृद्धि, अचश्च, तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी स्थाने योगा इत्यादीनि परिभाषासूत्रनाम्ना, इको यणचि, वृद्धिरेचि, एचोऽयवायाव:, वर्तमाने लट्, ण्वुल्तृचौ, करणे यज: इत्यादीनि विधिसूत्रनाम्ना, पतिस्समास एव, कृत्ताद्धितसमासाश्च, सरूपाणामेकशेष एकविभक्तौ, इत्यादीनि नियमसूत्रनाम्ना, लोटो लङ्वत्, स्थानिवदादेशोऽनल्विधौ, अप्लुतवदुपस्थिते, द्विर्वचनेऽचि इत्यादीन्यतिदेशसूत्रनाम्ना, पूर्वत्रासिद्धम्, प्रत्यय:, परश्च, ङ्याप्प्रातिपदिकात्, अङ्गस्य, धातो:, कारके कृत्या:, स्त्रियाम्'' इत्यादीन्यधिकारसूत्रनाम्ना च पाणिनीयव्याकरणे व्यपदिश्यन्ते।

**अधिकारसूत्राणां साधुत्वान्वाख्यापकत्वप्रदर्शनम्**

पाणिनीयव्याकरणप्रक्रियाप्रणाल्यनुसारं प्रत्यय: परश्च, स्त्रियाम् इत्याद्याधिकारसूत्राणां स्वस्वोपदेशदेशे लेशतोऽपि प्रयोजनाभावेऽपि तान्यधिकारसूत्राणि स्वस्वोपदेशदेशमपहाय तत्तद्विधिशास्त्रैकवाक्यतापन्नत्वेन लक्ष्यसंस्कारकमहावाक्यार्थबोधजननद्वारा संस्कृतवाङ्मयस्थ-निखिलवैदिकलौकिकसाधुत्वान्वाख्यापकानि भवन्ति।

**अधिकारसूत्रलक्षणम्**

संस्कृतवाङ्मयस्थनिखिलवैदिकलौकिकसाधुशब्दान्वाख्यानोपयोग्यधिकारसूत्रलक्षणं शाब्दिका: इत्थं निरुचान्ति। तद्यथा - स्वस्थले प्रयोजनाभावेऽपि स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वेन लक्ष्यसंस्कारकमहावाक्यार्थबोधजनकत्वमधिकारसूत्रलक्षणम्। एतल्लक्षणे महावाक्यार्थ-बोधजनकत्वमित्यत्र महावाक्यार्थस्यबोधो महावाक्यार्थबोध इति षष्ठीतत्पुरुषसमास:। महावाक्यार्थ-बोधशब्दोत्तरषष्ठया: विषयत्वमर्थ:। जनकत्वञ्च जन्यतानिरूपितजनकताश्रयत्वम्। तथा चैतदधिकारलक्षणघटकमहावाक्यार्थबोधजनकत्वमित्याकारकपदान्महावाक्यार्थविषयकबोधनिष्ठ-जन्यतानिरूपितजनकताश्रयत्वमित्यवान्तरबोधो जायते। तत्र जन्यपदार्थेषु सर्वेष्वप्यवच्छेदकावच्छेदेन

समवायसम्बन्धेन जन्यत्वस्यैवमेवावच्छेदकावच्छेदेन जनकपदार्थेषु सर्वेष्वपि समवायसम्बन्धेन जनकत्वस्य च सत्त्वात्-स्वस्थले प्रयोजनाभावेऽपि स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वेन लक्ष्यसंस्कारमहावाक्यार्थबोधविषयकसमवायसम्बन्धावच्छिन्नजन्यतानिरूपितसमवायसम्बन्धावच्छिन्नजनकताश्रयत्वमधिकारसूत्रलक्षणं फलति। एतल्लक्षणघटकजन्यत्वजनकत्वशब्दयोरुभयोरपि जातिबोधकत्वाज्जन्यत्वजनकत्वेतरधर्मानवच्छिन्नत्वाच्च स्वस्थले प्रयोजनाभावेऽपि स्वोत्तरवर्तिविधिशास्त्रैकवाक्यतापन्नत्वेन लक्ष्यसंस्कारकमहावाक्यार्थविषयकबोधनिष्ठसमवायसम्बन्धावच्छिन्नजातित्वावच्छिन्नजातित्वेतरधर्मानवच्छिन्नजन्यत्वेतरधर्मानवच्छिन्नजन्यत्वावच्छिन्नजन्यतानिरूपितसमवायसम्बन्धावच्छिन्नजनकत्वेतरधर्मानवच्छिन्नजनकत्वावच्छिन्नजनकताश्रयत्वमधिकारत्वमित्यधिकारसूत्रलक्षणं निर्दुष्टं फलति। एतदधिकारसूत्रलक्षणस्य धातोः इति सूत्रोदाहरणे पचतीत्यादावित्थं लक्षणसमन्वयः - धातोः इत्यधिकारसूत्रम्। पाणिनीयाष्टाध्यायीग्रन्थे तृतीयाध्यायस्य प्रथमपादस्य प्रथमसङ्ख्याकमिदं सूत्रम्। भूवादयो धातवः इति सूत्रेण भ्वादिगणपठितस्य क्रियावाचकस्य धातुसंज्ञा विधीयते। तादृशक्रियावाचकधातोर्लडादिकार्याणि विधीयन्ते। प्रकृते तृतीयाध्यायस्थप्रथमपादे पठितस्य धातोः इति सूत्रस्य स्वोपदिष्टस्थले शब्दसाधुत्वान्वाख्यापकप्रयोजनाभावेऽपि अचो यत् इत्याद्युत्तरसूत्रस्थलं गत्वा पूर्वदेशमपहाय अचो यत् इत्याद्युत्तरविधिशास्त्रैकवाक्यतापन्नत्वेन चेयम्, जेयमित्याकारकलक्ष्यसंस्कारकक्रियावाचकादजन्ताद्धातोः यत्प्रत्ययो विधीयते इत्याकारकमहा-वाक्यार्थबोधजननद्वारा ''धातोः'' इति सूत्रस्य व्याकरणप्रक्रियामाध्यमेन सकलसाधुशब्दानां साधुत्वान्वाख्यापकत्वादेतदधिकारसूत्रघटितलक्षणस्य समन्वयो जायते। अत एवोक्तं भगवता भाष्यकारेण स्वप्रणीते महाभाष्ये[२] - ''अधिकारो नाम त्रि प्रकारः। कश्चिदेक देशस्थस्सर्वं शास्त्रमभिज्वलयति'' इति। प्रपञ्चितञ्चैतद्वैयाकरणनागेशेन स्वप्रणीते[३] परिभाषेन्दुशेखरे। अधिकारलक्षणनिर्वचनावसरे भगवता पतञ्जलिना द्वितीयतृतीयाधिकारलक्षणे[४] महाभाष्ये इत्थं न्यरूपिषाताम्। इत्थं हि तत्रत्यो महाभाष्यग्रन्थः - अपरोऽधिकारः - यथा रज्ज्वा अयसा वा इदं काष्ठमनुकृष्यते ? तद्वदनुकृष्यते चकारेण।

अपरोऽधिकारः - प्रतियोगे तस्या निर्देशार्थमिति योगे योगे उपतिष्ठते। तद्यदेष पक्षः - अधिकारः प्रतियोगे तस्यानिर्देशार्थ इति, तदा हि यदेवादः पुरस्तादवयवषष्ठ्यर्थम्, एतदुत्तरत्रानुवृत्तं सत् स्थाने योगार्थं भविष्यति।

**अनुपसर्जनात् इति सूत्रप्रणयनस्यावश्यकता**

''प्रत्ययग्रहणे यस्माद्विहितस्तदादेस्तदन्तस्यग्रहणम्'' इति परिभाषया चरशब्दादेव टिदन्तात् प्रातिपदिकात् ''टिड्ढाणञ्'' इत्यादिसूत्रेण ङीपो विधानात् चरी इति साधुशब्दप्रयोगस्य सिद्धावपि कुरुचरशब्दस्य टिदन्तप्रातिपदिकत्वाभावेन तस्मात् टिड्ढाणञ् इत्यादिसूत्रेण ङीपोऽप्राप्त्या कुरुचरप्रातिपदिकादपि टिड्ढाणञ् इत्यादिसूत्रेण ङीब्विधानाय ''अनुपसर्जनात्'' इत्यधिकारसूत्रं श्रीमता पाणिनिनाष्टाध्यायीग्रन्थे प्रणीतम्।

**अनुपसर्जनात् इति सूत्रार्थवर्णनम्**

अनुपसर्जनात् इत्यधिकारसूत्रम्। श्रीमत्पाणिनिप्रणीताष्टाध्याय्यां चतुर्थाध्याये प्रथमपादे चतुर्दशसङ्ख्याकमिदं सूत्रम्। ङ्याप्प्रातिपदिकात् इति पूर्वसूत्रात् प्रातिपदिकादित्यत्र सूत्रेऽधिक्रियते। अनुपसर्जनादिति प्रातिपदिकादित्यस्य विशेषणम्। अनुपसर्जनात् प्रातिपदिकान्ङीबादयः प्रत्ययाः विधीयन्ते इति प्रकृतसूत्रार्थः। अत्र सूत्रे उपसर्जनपदेन

''प्रथमानिर्दिष्टं समासे उपसर्जनम्'' इति सूत्रपरिभाषितस्योपसर्जनस्य शास्त्रीयस्य नैव ग्रहणम्। अपि तु अनुपसर्जनात् इति सूत्रघटकानुपसर्जनपदेन प्रधानार्थवाचकलौकिकप्रातिपदिकस्यैव ग्रहणम्। इदञ्च अनुपसर्जनात् इत्यधिकारसूत्रं यूनस्तिः इति सूत्रावध्यधिक्रियते, न तु ततः प्राक् । व्याख्यानात्।

**अनुपसर्जनात् इति सूत्रज्ञापकत्वप्रतिपादनम्**

बहवः कुरुचराः यस्यां सा बहुकुरुचरा इत्यादावुपसर्जनप्रातिपदिकाद्बहुकुरुचरशब्दात् टिड्ढाणञ् इत्यादिसूत्रेण प्राप्तङीब्वारणाय श्रीमता पाणिनिना अष्टाध्यायीग्रन्थे अनुपसर्जनात् इति सूत्रं प्रण्यनायि।

अयमत्र पूर्वपक्षः - नन्वेवं बहवः कुरुचराः यस्यां सा बहुकुरुचरा, नदमतिक्रान्ता अतिनदा इत्याद्युदाहरणेषु समासप्रत्ययविधौ प्रतिषेधः इति तदन्तविधिनिषेधादेव बहुकुरुचरा, अतिनदेत्यादौ बहुकुरुचरातिनदशब्दाभ्यां टिड्ढाणञ् इत्यादिसूत्रेण ङीब्विधानस्याप्रसक्त्या बहुकुरुचरा, अतिनदा इत्यादौ बहुकुरुचरातिनदाभ्यामदन्तप्रातिपदिकाभ्यां प्रसक्तङीबादि-प्रत्ययनिषेधायानुपसर्जनाधिकारो नैवावश्यक इति ।

अत्रेदं समाधानम् - एवं तर्ह्युक्तदिशा अनुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति । तथा च तादृशानुपसर्जनाधिकारवैयर्थ्यज्ञापनादेव वनो र च इत्यादौ प्रातिपदिकपदेन वन्नन्तान्तप्रातिपदिकादेव वनो र च इति सूत्रेण ङीब्रेफादेशयोस्सिदध्या अतिधीवरी इत्यादिप्रयोगाणां साधुत्वं निराबाधम्।

ननु स्त्रीप्रत्ययेषु तदादिविधेरभावेपि नदइवाचरति नदा स्त्री इत्यादिष्वाचारक्विबन्तप्रकृतिकर्तृक्विबन्तेषु टिड्ढाणञ् इति सूत्रेण प्रसक्तङीबादिनिवृत्तयेऽनुपसर्जनाधिकारस्यावश्यकत्वात्कथमनुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति चेन्न। अनुपसर्जनाधिकारस्य स्त्रीप्रत्ययविधिषु तदन्तविधिज्ञापनार्थत्वपरभाष्य-ग्रन्थप्रामाण्यानुरोधेन स्त्रियामाचारक्विबन्तप्रकृतिककर्तृक्विबन्तप्रयोगाणामनभिधानान्नदोषः।

ननु पञ्चस्त्रीगोव्यक्तयो धनं यस्य सः पञ्चगवधनः इत्यत्र टजन्तस्य द्विगोः इति सूत्रेण टिड्ढाणञ् इति सूत्रेण वा प्राप्तङीब्वारणायानुपसर्जनाधिकारस्यानिवार्यत्वेन कथमनुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयेदिति चेन्न । पञ्चगवधन इत्यत्रार्थवत्सूत्रोक्तपारिष्कृतार्थवत्त्वाभावाट्टजन्तप्रातिपदिकत्वाभावेन तस्मान्न ङीप् ।

ननु आपिशलिना प्रोक्तमित्यर्थे आपिशलिशब्दात् ''तेन प्रोक्तम्'' इति सूत्रेण प्रोक्तार्थेऽणि ततोऽध्येत्रणि तस्य प्रोक्ताल्लुक् इति सूत्रेण लुकि आपिशला ब्राह्मणीत्यत्राणणन्नतत्वप्रयुक्त-ङीब्वारणायानुपसर्जनाधिकारस्यावश्यकत्वात्कथमनुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिज्ञापकत्वं बोधयतीति चेन्न। प्रोक्ताणः स्त्रियामवर्तनात् प्रोक्तार्थकाण्प्रत्ययान्ता-न्ङीपोऽप्राप्त्या अध्येत्रणो लुग्विधान्नाल्लुका लुप्ते न लुमताङ्गस्य इति प्रत्ययलक्षणनिषेधेनाध्येत्राण्प्रत्ययान्तप्रातिपदिकस्याप्यभावेनोक्तदिशा प्रोक्तार्थकाण्प्रत्ययान्तादन्तप्रातिपदिकादध्येत्राणणन्नन्तप्रातिपदिकाच्च टिड्ढाणञ् इति सूत्रेण प्राप्तङीब्वारणायानुपसर्जनाधिकारस्यानावश्यकतयानुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति। तज्ज्ञापनादापिशला ब्राह्मणी इत्यत्रादन्तप्रातिपदिकादापिशलशब्दात्प्रसक्तङीब्वारणायानुपसर्जनाधिकारस्य स्वांशे-चारितार्थ्यसम्भवान्नदोषः। वर्णाश्रये प्रत्ययलक्षणाभावेन, स्त्रियामित्यस्य गृह्यमाणविशेषणत्वादेव च काशकृत्स्ना ब्राह्मणी इत्यत्र काशकृत्स्नशब्दात्प्राप्तङीब्वारणायानुपसर्जनाधिकारोव्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति। तज्ज्ञापने तु पूर्वोक्तानुपसर्जनाधिकारज्ञापनानुरोधेन सोऽनुपसर्जनाधिकारो व्यर्थीभूय स्त्रीप्रत्ययेषु तदन्तविधिज्ञापनद्वारा आपिशलाब्राह्मणी इत्यत्र न ङीपः प्रसक्तिः। तस्मादुक्तदिशा अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वफलं

बहुकुरुचरा इत्यत्र प्रसक्तस्य टिड्ढाणञ् इति सूत्रविहितङीब्वारणमेव। अनुपसर्जनाधिकारस्य तदन्तविधि-ज्ञापनादेव प्राधान्यादेतदारम्भाच्च स्त्रियामिति ङीप्प्रकृतिविशेषणमेव। स्त्रियामित्यस्य ङीप्प्रकृतिविशेषणत्वादेव अतिधीवरी इत्यत्रातिधीवन् शब्दादपि वनो र च इति सूत्रे ङीब्रेफौ च भवत:। अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वस्वीकारादेव कारशब्दस्येवकुम्भकार-शब्दस्यापि प्रत्ययग्रहणपरिभाषया अण्णन्तत्वात् कुम्भकारस्यापत्यं पुमानित्यर्थे कुम्भकारशब्दादपि तस्यापत्यमित्यनेनाणि तद्धितेष्वचामादे: इति सूत्रेण प्रातिपदिकावयवस्याद्यचो वृद्धौ कृतायां निष्पन्नात् कौम्भकारशब्दादण्णन्तप्रातिपदिकात् स्त्रीभ्यो ढक् इति सूत्रेण ढकि, कस्यानुबन्धलोपे आयनेयीनीयिय: फढखछघां प्रत्ययादीनामिति सूत्रेण ढस्येयादेशे, यस्येति च इत्यनेन पूर्वस्याङ्गावयवस्याकारस्य लोपेकौम्भकारेयशब्दस्य कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां तत: प्रथमैकवचने सुपि, तस्य सुप्रत्ययावयवयोरनुबन्धलोपे सस्य रुत्वविसर्गयो: कृतयो: कौम्भकारेय इति प्रयोगस्य साधुत्वसिद्धि:। अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वाभावे कौम्भकारेय: इत्यत्र प्रत्ययग्रहणपरिभाषया कारशब्दस्यैवाण्णन्तत्वात्ततो ङीप्यनुपसर्जनस्त्रीप्रत्ययविषये तदादिनियमाभावेन विशिष्टस्यापि स्त्रीप्रत्ययान्तत्वात्ततो ढकि कौम्भकारेय: इति साधुशब्दप्रयोगस्य सिद्धावपि कारीशब्दस्यापि स्त्रीप्रत्ययान्ततया कदाचित्ततोऽपि ढकि तन्निरूपिताङ्गत्वस्य विशिष्टेऽभावेन ककारावयवोकारस्य वृद्ध्यभावे कुम्भकारेय: इत्यनिष्टरूपापत्तिस्स्यात्।

नन्वेवमनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वाभावेऽपि ''कुद्ग्रहणे गतिकारक-पूर्वस्यापि ग्रहणम्'' इति[५] परिभाषया कौम्भकारशब्दस्याप्यण्णन्तत्वात्ततो ढकि तद्धितान्तनिबन्ध-नकार्येषु कृतेषु कौम्भकारेय इति प्रयोगस्य साधुत्वसिद्ध्याऽनुपसर्जनाधिकारस्य तदन्तविधि-ज्ञापकत्वमयुक्तमिति चेन्न। कृद्ग्रहणपरिभाषाया: कृन्मात्रग्रहणे एव प्रवृत्त्या न तया विशिष्टादेव ढकोऽप्राप्त्या कुम्भकारशब्दादेव ढक्प्रत्ययविधानायोक्तरीत्यानुपसर्जनाधिकारस्य तदन्तविधि-ज्ञापकत्वमुचितमेव।

नन्वेवं प्रतिपादितदिशानुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वस्य कथञ्चिज्ज्ञापकत्व-सम्पादनेऽपि व्यपदेशिवदेकस्मिन् इति[६] परिभाषया समुदायात् कुम्भकारशब्दान्ङीप्यपिस्त्रीप्रत्यये तदादिनियमाभावेन व्यपदेशिवद्भावेन केवलकारशब्दादपि ढक्प्रत्यये कृते पुन: कुम्भकारेय: इति प्रयोगापत्तिरिति चेन्न । अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वप्रतिपादनसामर्थ्यादेव असहाये एव व्यपदेशिवद्भावप्रवृत्तेश्शब्दशास्त्रसिद्धान्तसम्मततया प्रकृते कुम्भकारशब्दावयव-कारशब्दस्य ससहायत्वेनात्र व्यपदेशिवद्भावाप्रवृत्त्या केवलकारशब्दात्प्राप्तढको वारणायानुप-सर्जनाधिकारस्य तदन्तविधिज्ञापकत्वम्मूर्धन्यतया शिरोधार्यमेव।

अयमत्र महान् पूर्वपक्ष: - नन्वेवं सर्वादीनि सर्वनामानि इति सूत्रे [७]भाष्ये भगवता महाभाष्यकारेण ''अनुपसर्जनादित्येष योग: प्रत्याख्यायते इत्यभाणि। अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वे पूर्वोक्तसर्वादिसूत्रभाष्यविरोधापत्तिरिति।''

अत्रेदं समाधानम् - पूर्वोक्तसर्वादिसूत्रस्थभाष्यस्य वार्तिककारमताभिप्रायकत्वेन वार्तिककारमतानुवादकत्वान्न तद्भाष्यमनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वे बाधकम्।

**समीक्षा -**

एतावता प्रबन्धेनानुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वमनेकप्रबन्धप्रबन्धप्रदर्शन-पूर्वकमत्रानुसन्धानपत्रे गवेषकेण मया साङ्गोपाङ्गं व्यवृण्वि। अस्य सिद्धान्तस्य पाणिनीयव्याकरणे मुनित्रयसम्मतत्वादेव पाणिनीयशब्दशास्त्रे सूत्रकारादारभ्य वैयाकरणनागेशपर्यन्तं प्राचीननवीननवैयाकरणास्सर्वेऽप्येनं सिद्धान्तं मूर्धाभिषेचयन्ति। यद्यपि वार्तिककारेण सर्वादिसूत्रस्थभाष्यग्रन्थप्रमाणपुरस्सरमनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वन्निराकृतं, तदपि पूर्वपक्षिमतानुवादकमेवेति न दोषः। अत एव वैयाकरणशिरोमणिः भट्टोजीदीक्षितो वैयाकरणसिद्धान्त-कौमुदीग्रन्थेऽनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वसिद्धान्तस्साङ्गोपाङ्गं जग्रन्थ। इत्थं हि तत्रत्यो[८] वैयाकरणसिद्धान्तकौमुदीग्रन्थः - ''अनुपसर्जनात् अधिकारोऽयम्। यूनस्तिः इत्यभिव्याप्य। अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति'' इति। वैयाकरणनागेशोऽपि स्वप्रणीते [९]लघुशब्देन्दुशेखरे अनुपसर्जनाधिकारस्य तदन्तविधिज्ञापकत्वसिद्धान्तं साङ्गोपाङ्गं प्रत्यष्ठापयत्।

**अत्रार्थे नागेशाशयवर्णनम्**

अयमत्र नागेशाशयः - सर्वादिसूत्रस्थस्य प्रत्याख्यायते इति भाष्यस्य वार्तिककृतेति शेषः। प्रकृतसूत्रे अनुपसर्जनग्रहणमनर्थकं, प्रातिपदिकेन तदन्तविधिप्रतिषेधात् इति वाक्यस्य वार्तिककृता सूत्रस्यास्य प्रत्याख्यानादित्यर्थः। उक्तवार्तिकस्य अनुपसर्जनादिति किमर्थं, बहुकुरुचरा। नैतदस्ति प्रयोजनं, कुरुचरशब्दात् प्रत्ययो विधीयते। तत्र कः प्रसङ्गो यद्बहुकुरुचर-शब्दात्स्यात् । नैव प्राप्नोति, नार्थः प्रतिषेधेन। तदन्तविधिना प्राप्नोति । अत उत्तरं पठति। अनुपसर्जनग्रहणमनर्थकमिति । तत्र भाष्यकृदुक्तावतरणे पठतीति प्रथमपुरुषस्वारस्येन, सर्वादिसूत्रे भाष्ये अनुपसर्जनादित्येष योगः प्रत्याख्यायते, तमेवमभिसम्भत्स्यामः इत्युत्तमपुरुषस्वारस्येन च प्रत्यख्यानस्य वार्तिककृत्सिद्धान्तत्वप्रतीतेः। वार्तिककारोक्तसंज्ञोपसर्जनप्रतिषेधप्रत्याख्यानाय हि सर्वादिसूत्रे तदुक्तम्। यद्यनुपसर्जनादिति सूत्रप्रत्याख्यानपूर्वकं तदधिकारस्य तदन्तविधिज्ञापकत्वनिराकरणे तत्समर्थकमहाभाष्यकारादिसिद्धान्तस्य व्याघातापत्तेः। अतः पूर्वोक्तादिशानुपसर्जनाधिकारस्य वैयर्थ्यप्रदर्शनपूर्वकतदन्तविधिग्रहणज्ञापकत्वमेव पदशास्त्रीयमुख्यसिद्धान्तसम्मतमितिवैयाकरणनागेशस्य निगूढाशय इत्यलम्पल्लवतल्लजकल्पा नल्पजल्पनेनेति दिक्।

**पादटिपणी -**

१. व्याकरणमहाभाष्यम् (प्रदीपोद्योतछायाटीकात्रयोपतेम्) प्रथमध्यायः - प्रथमपादः - नवाह्निकान्तभागः प्रथमम्-पस्पशाह्निकम्-पृष्ठसङ्ख्या- २३

२. व्याकरणमहाभाष्यम् - प्रदीपोद्योतच्छायाटीकात्रयोपेतम् - प्रथमाध्यायः - प्रथमपादः - प्रथमाह्निकम्-सूत्रसंख्या-४९ पृष्ठसंख्या - ४१०

३. परिभाषेन्दुशेखरः (नागेशगूढार्थदीपिकासहितः) पृष्ठसंख्या - १६

४. व्याकरणमहाभाष्यम् - प्रदीपोद्योतच्छायाटीकात्रयोपेतम् - प्रथमाध्यायः - प्रथमपादः - नवाह्निकान्तभागः - सप्तमाह्निकम् - सूत्रसङ्ख्या - १-४-४६ पृष्ठसंख्या - ४१०

५. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् - परिभाषासङ्ख्या - २८
परिभाषेन्दुशेखरः (नागेशगूढार्थदीपिकासहितः) पृष्ठसंख्या - १६३

६. व्यपदेशिवदेकस्मिन् - परिभाषासङ्ख्या - ३०
परिभाषेन्दुशेखरः (नागेशगूढार्थदीपिकासहितः) पृष्ठसंख्या - १७१

७. व्याकरणमहाभाष्यम् - प्रदीपोद्योतच्छायाटीकात्रयोपेतम् - प्रथमाध्यायः - प्रथमपादः - षष्ठीह्निकम् - पृष्ठसंख्या - ३२४

८. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमाटीकोपेता)
स्त्रीप्रत्ययप्रकरणम् - पृष्ठसंख्या - ३६०

९. लघुशब्देन्दुशेखरः (गुरुप्रसादशेषसहितः) स्त्रीप्रत्ययप्रकरणम् - पृष्ठसंख्या-११५५ तः ११६३

**अनुशिलितग्रन्थाः -**

| **ग्रन्थः** | **ग्रन्थकारः** | **प्रकाशकः** | **प्रकाशनवर्षम्** |
|---|---|---|---|
| वैयाकरणसिद्धान्तकौमुदी (बालमनोरमाटीकोपेता) | भट्टोजीदीक्षितः वासुदेवदीक्षितः | चौखम्बासंस्कृत संस्थानवाराणसी | वि.व.२०५० १९६४ संस्करण द्वादश |
| परिभाषेन्दुशेखरः (नागेशगूढार्थदीपिकोपेतः) | भट्टनागेशः परिवेङ्कटेश्वरशास्त्री | आन्ध्रविश्वकला परिषत्, वाल्टेर सरस्वती मुद्रणालयः राजमहेन्द्रवरम् | ए.डी. १९५५ |
| लघुशब्देन्दुशेखरः (गुरुप्रसादशेषसहितः) | भट्टनागेशः पेरिवेङ्कटेश्वरशास्त्री | आन्ध्रविश्वकला परिषत् चिन्नवाल्टेर मुद्रकः विद्यामुद्रणालयः कुम्भकोणम् | ए.डी. १९४१ |
| व्याकरणमहाभाष्यम् प्रथमाध्यायप्रथमपादः नवाह्निकान्तभागः प्रदीपोद्योतछायाटीकात्रयोपेतम् | पतञ्जलिः कैयटः नागेशः | चौखम्बा संस्कृत प्रतिष्ठान दिल्ली पुनर्मुद्रित संस्करणम् | ए.डी. १९९२ |


आचार्यः, व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),
श्रीसदाशिवपरिसरः, पुरी, ओडीशा, ७५२००१

# धातोः

**प्रो. अनुपमा पृष्टिः**

संसारोऽयं शब्देन प्रतिपद्यते। तेषां शब्दानामर्थः कथं बोध्यते इति प्रश्नो जायते। अतः शब्दार्थयोः कश्चन सम्बन्धः अवश्यं विद्यते। सोऽयं सम्बन्धः वृत्तिपदेनाभिधीयते। तेन शाब्दबोधं प्रति वृत्तिज्ञानं कारणं भवति। सा च वृत्तिस्त्रिधा। शक्तिः-लक्षणा-व्यञ्जनेति। परन्तु प्रक्रियासाधनेऽपि वृत्तिर्विद्यते। सा तु परार्थाभिधानं वृत्तिः।

ताः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृतयः।

प्रक्रियाज्ञानं तु पाणिनिव्याकरणेन ज्ञायेत। तत्र षड्विधानि सूत्राणि । तद्यथा –

संज्ञा च परिभाषा च विधिर्नियम एव ।
अतिदेशोऽधिकारश्च षड्विधंसूत्रमुच्यते ।

तत्र अधिकारो नाम ''उत्तरोत्तरसूत्रेषु पूर्वस्याधिकृतस्य पदस्य सूत्रस्य वाऽनुवृत्तिः।'' यथा - ''पूर्वत्रासिद्धम्''[१] इत्यत्र सपादसप्ताध्यायों प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामापि पूर्वं प्रति परमसिद्धम् इति अधिकारत्वात्। तेन ''होढः[२] इति सूत्रे अधिकारत्वात् अयमर्थो निष्पद्यते - ''हस्य ढः स्यात्, इदं च शास्त्रं पूर्वत्रासिद्धम्'' इति। पतञ्जलिना अधिकारपरिभाषासूत्रयोः मध्ये विशेषता प्रतिपादित। यत्-

''अधिकारः प्रतियोगं तस्य निर्देशार्थक इति योगे योगे उपतिष्ठते, परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्।''[३] महाभाष्यदिशा - अधिकारस्तु त्रिविधः।

(क) उत्तरोत्तरसूत्रेण सम्बन्धः - यथा 'अङ्गस्य' (६/४/१)

(ख) चकारेण अपकर्षणम् - यथा 'अचो रहाभ्यां द्वे' (८/४/४६) इति सूत्रात् द्वे इत्यस्य अपकर्षणम् 'अनचि च' (८/४/४७) सूत्रे चकारेण भवति।

(ग) परिभाषारूपम्

भाष्यकारेण श्लोकरूपेण प्रतिपादितम् -

अधिकारगतिस्त्र्यर्थाः विशेषायोधिकं कार्यम्
अथ योऽन्योऽधिकः कारः पूर्वविप्रतिषेधार्थः सः ।।[१]

अर्थात् एकत्र उपात्तं भूत्वा अन्यत्र व्यापारयुक्तसूत्रमधिकारः इति 'स्वरितेनाधिकारः' सूत्रभाष्ये। तत्र त्रिविधैः प्रकारैः युक्तः। तद्यथा-सिंहावलोकनवत्, मण्डूकप्लुतिवत्, गङ्गाप्रवाहवत्, तत्रैवोक्तम्-

सिंहावलोकितं चैव माण्डूकप्लुतमेव च
गङ्गाप्रवाहवच्चापि अधिकारस्त्रिधा मतः ।।

एतदर्तारच्य 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' इति पाणिनीयसूत्रे - अर्थाधिकारः, भावाधिकारः, शास्त्राधिकारः' इति एतेषां चर्चा दृश्यते। तत्रोक्तम् - भावे इति च न स्वर्यते पूर्व

एवात्रार्थाधिकार:। एवं भृञोऽसंज्ञायाम् सूत्रे 'स्त्रियां' भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति। 'पूर्वत्रासिद्धम्' इत्यत्र शास्त्राधिकारस्य चर्चा भवति।

धात्वाधिकार: अष्टाध्याया: तृतीयोऽध्याये विद्यते। तत्र चतुर्भि: सूत्रै: 'धातो' इति पदमुच्चार्यते। तद्यथा-

(क) धातो: कर्मण: समानकर्त्तृकादिच्छायां वा (३-१-७)

(ख) धातोरेकाचो हलादे: क्रियासमभिहारे यङ् (३.१.२२)

(ग) धातो: (३-१-९१)

(घ) शमि धातो: संज्ञायाम् (३-२-१४)

परन्तु 'धातो:' इति सूत्रेण धात्वधिकार: तृतीयाध्यायस्यान्तिमसूत्रपर्यन्तं विद्यते। तेन अधिकारान्तर्भुक्ता: प्रत्यया: धातो: परे विधीयते, न तु प्रातिपदिकात् परे, 'धातो:' इति सूत्रात् पूर्व यत् 'धातो: कर्मण: समानकर्त्तृकादिच्छायां वा', 'धातोरेकाचो हलादे: क्रियासमभिहारे यङ्' इति सूत्रद्वयं विद्यते तस्य 'सनाद्यन्ता धातव:'[४] इति सूत्रेण धातुसंज्ञा भवति। तेन सन्नन्तात् धातो: परे कृत्प्रत्यया: विधीयन्ते।

'धातो:' इति पञ्चम्यन्तनिर्देशेन काशिकाकारेणोक्तम्- 'धातो:' इति विधानादत्र सन: आर्धधातुकसंज्ञा भवति, न पूर्वत्र।'' भट्टोजिदीक्षितेनापि लिखितम् - ''धातोर्विहितत्वादिह सन आर्धधातुकत्वम्। तेन इट्, द्वित्वम्'' इति। अर्थात् 'आर्धधातुकं शेष:' (३/४/२२४) इति सूत्रे 'धातो:' इत्यस्याधिकारत्वात् तिङ्शित्भिन्नस्य आर्धधातुकसंज्ञा विधीयते। तेन 'पिपठिषति' इत्यत्र 'अर्धाधातुकस्येड् बलादे:' (७/२/३५) इति इडागम: प्रवर्तते।

'धातो: कर्मण: समानकर्त्तृकादिच्छायां वा' (३/२/७) इत्यस्य पूर्ववर्ती 'गुप्तिज्किद्भ्य: सन्' (३/२/७) मान्बन्धदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३/२/६) सूत्रे धातो:' (३/२/५) इत्यस्य परामर्श: न जायते। तत्र सन्इत्यस्य अर्धधातुकसंज्ञा न प्रवर्त्तते। अत: 'जुगुप्सते' इत्यत्र सन्प्रत्ययस्य धातुत्वभावात्, अर्धधातुकस्वाभावात् इडागम: न प्रवर्त्तते। अत: 'धातो: कर्मण: समान:' इति सूत्रे धातुग्रहणस्य प्रयोजनं पदमञ्जुरीकारेणोक्तम्।

पुन: 'धातोरेकाचो हलादे: क्रियासमभिहारे यङ्'[५] इति सूत्रे धातो: इत्यस्य प्रयोजनं किमर्थमिति काशिकायामुक्तम्- ''सोपसर्गादुत्पत्तिर्मा भूत् भृशं प्राटति''। पदमञ्जुरीकाराणां मते क्रियासमभिहारे वृत्यसंभवात् प्रश्नमिदमुत्थापितम्। अत्र सूत्रे धातुग्रहणाभावे धातूपसर्गसमुदायस्य क्रियावाचीत्वात् यङ्प्राप्ते 'भृशं प्राटति' इत्यस्य उपसर्गस्य द्विर्वचनापत्ति:। अत: उक्तम् धातूपसर्गस्य संघाते न यङापत्ति:। तहि धातुग्रहणस्यावश्यकता नास्ति। अन्तत: आर्धधातुकसंज्ञार्थं धातुग्रहणं स्वीकर्त्तव्यम्। एतदर्थं न्यासकारेणोक्तम्- ''सोपसर्गादुत्पत्तिर्माभूत्'' इत्यशंसस्य व्याख्या एवमुक्ता - 'असति धातुग्रहणे एकाज् य: शब्दो हलादे: क्रियासमभिहारे वर्त्तते तस्माद् यङ् प्रत्ययो भवतीत्येष: सूत्रार्थ: स्यात्।

ततश्च प्रपूर्वादटतेर्यङ् प्रसज्येत्'' । भट्टोजिदीक्षितेन धातोः इति प्रयोगः सूत्रे किमर्थमिति चेदुक्तम् - ''आर्धधातुकत्वं यथा स्यात्। तेन 'ब्रुवो वचिः' (२/४/५३) इत्यत्र आर्धधातुकत्व लाभः अस्य फलम्। तत्वबोधिनीकारः 'वाव्रच्यते, चाख्यायत' इत्यादिरूपसिद्धिः अस्य धातोः ग्रहणस्य प्रयोजनमिति उपस्थाप्य 'धिक्' इत्यव्ययेन यङ् इत्यस्य व्यावृत्यर्थं ''धातुग्रहणाभावे धिगित्यव्ययात् यङ् स्यात्तस्य क्रियावाचित्वादेकात्वाचेति, तद्वारणार्थमपि धातुग्रहणमावश्यकमित्याहुः।''

'कण्डवादिभ्यो यक्' (३/२/२७) सूत्रे काशिकाकारेण धात्वधिकारस्य फलं विचिन्त्य उक्तम् - द्विविधाः कण्डवादयः। धातवः प्रातिपदिकानि च। तत्र धात्वधिकारात् धातुभ्य एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः। अर्थात् 'धातोः' अधिकारत्वात् कण्डवादि धातुरूपात् यक् विधीयते।

तृतीयाध्यायस्य अन्तिमपर्यन्तं 'धातोः अधिकारत्वात् 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति सूत्रात् धातोः इत्यस्य अनुवृत्ति सम्भवेऽपि पुनः 'धातोः' इति सूत्रस्य किं प्रयोजनमिति चेत् - कृत्संज्ञा एवमुपपदसंज्ञार्थम्। यद्येवं न स्वीक्रियते तर्हि 'करिष्यति' इत्यत्र 'स्यतासी लृलुटोः'[६] इत्यनेन विहितस्य प्रत्ययस्य कृदतिङ् इति सूत्रेण कृत्संज्ञा भवितुमर्हति। 'कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' (२/२/४६) इति सूत्रेण प्रातिपदिकसंज्ञायां सुबुत्पत्तिः जायते। अतः पूर्वसूत्रेण विद्यमानधातोः पदे धात्वधिकारः न भवति। पृथक्रूपेण 'धातोः' इति अधिकारसूत्र विधानं भवति। पुनः 'शमि धातोः संज्ञायाम्' (३-२-२४) इति सूत्रे धातोः (३/२/९१) इत्यस्याधिकारत्वेऽपि पुनः धातोः ग्रहणं कृ धातोः हेत्वाद्यर्थे टप्रत्ययः बाधनार्थमिति काशिकाकाराणां मतम्। तेनोक्तम् - 'शमिसंज्ञायां इति सिद्धे धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम्'' । धातुग्रहणाभावे शङ्करा इत्यत्र टप्रत्ययः अच्प्रत्ययश्च परत्वात् ट प्रवर्त्तते। परन्तु सूत्रे धातुपदस्य ग्रहणेन तत्सामर्थ्यात् अच्प्रत्ययः प्रवर्त्तते। एवञ्च धातोः (३.२.९२) इति तत्रादनन्तरं 'तत्रोपपदं सप्तमीस्थम्'[७] इति सूत्रस्य वृत्तौ लिखितमस्ति- ''तत्रैतस्मिन् धात्वधिकारे तृतीये'' अतः 'धातोः' इति अधिकारसूत्रम्। यदि धातोः अधिकारः नैव स्वीक्रियते तर्हि धातूपसर्गसमुदायस्य क्रियावाचीत्वात् प्रत्ययापत्तिः जायते, तत् विशिष्टस्य अङ्गसंज्ञायां अडागमादि प्रवर्त्तते।

**राष्ट्रियसंस्कृतसंस्थानम्**
**सदाशिव परिसरः**
**आचार्या, नव्य-व्याकरणम्**

पादटिप्पणी

१.पा.सू. ८/२/१   २. पा.सू. ८/२/३२

३.महाभाष्य - २-१-१   ४. पा.सू. ३/२/३२

५.पा.सू. ३/२/२२   ६. पा.सू. ३/२/३३

७.पा.सू. ३/२/९२

# आकडारादेका संज्ञा

डॉ. सीमाचलपण्डा

व्याकरणशास्त्रे सूत्रं षड्विधं यथा -

संज्ञा च परिभाषा च विधिर्नियम एव च ।

अतिदेशोऽधिकारश्च षड्विधंसूत्रमुच्यते ।। इति उक्तम्।

एतेषु अधिकारसूत्रमन्यतमं गुरुत्वपूर्णं च। अधिकारस्य लक्षणं तु ''स्वदेशेवाक्यार्थ-शून्यत्वे सति परदेशेवाक्यार्थबोधजनकत्वम् अधिकारत्व''मित्युक्तम्। अधिकारसूत्राणां पूर्णभावेनांशिकभावेन च परवर्तिसूत्रेषु पुनरावृत्ति: भवति इति। ''स्वरितेनाधिकार:[१]'' इति पाणिनीयसूत्रेण ज्ञायते यत् यानि सूत्राणि स्वरितचिह्नयुक्तानि तानि अधिकारसूत्राणि इति। यानि सूत्राणि प्राक्शब्दयुक्तानि पंचमीविभक्तिप्रयुक्तानि च तान्यपि अधिकारसूत्राणि इति ज्ञायते। यथा प्राग्रीश्वरान्निपाता:[२]। शब्दकौस्तुभेऽपि उक्तम् - ''एकत्रोपात्तरचान्यत्र व्यापार: अधिकार:'' इति। अयमधिकार: त्रिप्रकारक: यथा -

सिंहावलोकितं चैव मण्डुकप्लुतमेव च ।

गंगाप्रवाहवच्यापि अधिकारस्त्रिधा मता: ।। इति।

साधारणत: अधिकारसूत्राणि गंगाप्रवाह: इव परवर्तिसूत्रेषु अनुवृत्तानि तेषामर्थबोधनाय सहायकानि भवन्ति। कानि चित् सूत्राणि साक्षात्परवर्त्तिसूत्रेषु अननुवृत्तानि किंचित् किंचित् उत्प्लुत्य अन्यसूत्रेषु अनुवृत्तानि भवन्ति । तानि मण्डुकप्लुताधिकारसूत्राणि, अन्यानि कानि चित् भवन्ति यानि परवर्तिसूत्रेषु कार्यं न कृत्वा सिंह: यथा पश्चात् मुखं कृत्वा पश्यति तद्वत् कस्मिन् चित् सूत्रे प्रभावं पातयन्ति । ते भवन्ति सिंहावलौकिताधिकारा:। अष्टाध्याय्यां प्राय: ४९ संख्यकानि अधिकारसूत्राणि भवन्ति ।

प्रस्तुतप्रबन्धे ''आकडारादेका संज्ञा[३]'' सूत्रविषये आलोच्यते। पाणिनेरष्टाध्याय्या: प्रथमाध्यायस्य चतुर्थपादस्य प्रथमं सूत्रमिदम्। इत ऊर्ध्वं ''कडारा: कर्मधारये[४]'' इति सूत्रात् प्राक् अस्य सूत्रस्याधिकार:। अत एतत् अधिकारसूत्रम्। आ कडारात् एका संज्ञा इति चतुष्पदात्मकं सूत्रम्। आ इति आङ् उपसर्ग:। तत्र च अवधिबोधनात् मर्यादार्थक: आ शब्द:। नात्र अभिविधौ आ शब्द:। कडारशब्दस्यापि प्रवेशे प्रयोजनाभावात्। कडारात् इति पंचम्यन्तेन तस्मात् प्रागर्थ: लभ्यते। एका संज्ञा बोध्या इति क्रियायामन्वय:। एवं च इत ऊर्ध्वं 'कडारा: कर्मधारये' इत्यत: प्रागेकस्यैकैव संज्ञा बोध्येति सूत्रार्थ:।

तत्र संज्ञाविषये दृश्यते यत् एकस्याद्देश्यस्य अनेका: संज्ञा: भवन्ति। यथा 'तव्यत् तव्यानीचर:' इत्यादि प्रत्ययानां प्रत्ययसंज्ञा कृत्यसंज्ञा कृत्संज्ञा च भवन्ति। परन्तु यत्र संज्ञानां विरोध: तत्र ''विप्रतिषेधे परं कार्यमिति[५]'' इति सूत्रेण परकार्यं भवति इति निर्बाध एव। यत्र तु निर्विरोध: तत्र ''येन नाप्रप्ते योविधिरारभ्यते स तस्य बाधको भवतीति'' परिभाषया बलवत्तासिद्धा एव। तर्हि एतस्य सूत्रस्य कावश्यकता ? इति जिज्ञासायां नागेशेन तत्रोक्तम्[६] - एकसंज्ञाधिकार: संज्ञास्थले प्रवर्तते, तत्र च शास्त्रे तव्यदादिप्रत्ययेषु कृत्कृत्यप्रत्ययसंज्ञादीनां समावेशदर्शनेन विप्रतिषेधसूत्रस्य येन नाप्राप्ते परिभाषायाश्च संज्ञास्थले अप्रवृत्तिरिति ज्ञाप्यते। लोकेऽपि संज्ञास्थले

एतयो: प्रवृत्ति: न दृश्यते। यथा तक्रकौण्डन्यन्यायश्च प्रयोगे अबाध:।

एवं च एकसंज्ञाधिकारे सति द्वयो: संज्ञयो: एकत्र प्रवृत्तौ कस्या: प्रवृत्ति: स्यादिति ? तत्राह दीक्षितेन - या परा अनवकाशा[७] च तत्र द्वयो: सावकाशयो: परा, निरवकाशेऽपि परैव भवतीति अर्थ:। यथा - पराशास्त्रविहितसंज्ञाया: स्थलम् - धनुषा विध्यति इति। अत्र धनुष: शरा: निर्गगच्छन्ति। तै: विध्यति इत्यर्थ:। अत्र शराणां विश्लेषक्रियाश्रयत्वं धनुषश्च क्रियानाश्रयित्वेन अवधित्वं प्राप्नोति। व्यधनक्रियायाश्च साधकतमं धनु: भवति। तेनात्र द्वयो: सावकाशयो: परत्वेन करणसंज्ञा अपादानं बोधते। अत: धनुषा इति करणसंज्ञात्वात् तृतीयाभवति।

अनवकाशसंज्ञाया: स्थलं यथा अङ्गाधिकारप्रकरणे 'यचि भम्[८]' इति भसंज्ञा भवति। 'स्वादिस्वसर्वनामस्थाने[९]' इति - पदसंज्ञा भवति। अत्रपरे सति अनवकाशत्वात् भसंज्ञा एव प्रवर्तते। यतोहि पदसंज्ञा असर्वनामस्थानेषु सर्वेषु स्वादिषु प्राप्यते। परन्तु भसंज्ञाया: स्वादिषु अजादिषु यकारादिषु च प्राययेषु प्राप्यते। तेन अनवकाश: सीमित:। भसंज्ञा बलवती भवति। यथा विश्वप:। विश्वपाशब्दात् शसि अनुबन्धकार्ये विश्वपा अस् इति स्थितेऽत्र सुडनपुंसकस्य[१०] इत्यनेन सु औजस् अम् औट् इत्येषां सर्वनामस्थानसंज्ञाविहितत्वात् शसो न सर्वनामस्थानसंज्ञा, तेन 'स्वादिष्वसर्वनामस्थाने' इत्यनेन सर्वनामस्थानभिन्नस्वादिषु शसादिषु परषु पूर्वस्य विश्वपाशब्दस्य पदसंज्ञायां प्राप्तायां 'यचि यम्' इत्यनेन सर्वनामस्थानभिन्नयजादिषु स्वादिषु परेषु भसंज्ञायां प्राप्तायाम् 'आकडारादेका संज्ञा' इत्यनेन एकस्यैव संज्ञा भवतीति नियमात् परत्वादनवकाशत्वाच अत्र भसंज्ञा एव जाता। भसंज्ञायाम् 'आतो घातो:' इति सूत्रेण 'अलोऽन्त्यस्य' इत्यनेन च आकारलोपे संयोगे सरच रुप्वे विसर्गे च विश्वप: शब्द: सिद्ध:।

महाभाष्येऽपि सूत्रस्यास्यावश्यकता उक्ता। विप्रतिषेधसूत्रेण परमिति वचनात् संज्ञासिद्धौ किमर्थमिदमुच्यते इति शंकां विधाय उच्यते[१२] - अन्यत्र संज्ञासमावेशानियमार्थं वचनमिति। तत्र यथा लोके तथैव व्याकरणेऽपि एकत्र संज्ञानां समावेश: दृश्यते। लोके यथा 'एकस्य द्रव्यस्य बह्व्य: संज्ञा - इन्द्र:, शक्र:, पुरुहत: पुरन्दर:' इति। व्याकरणेऽपि तव्यप्रत्ययान्ते कर्त्तव्यमित्यादौ प्रत्ययकृत्कृत्यसंज्ञानां समावेश:। तद्धितान्ते पाञ्चालादिशब्दे प्राप्ययतद्धित तद्रासंज्ञानां समावेश: दृश्यते। एतस्मात् कारणात् 'आकडारादेकासंज्ञा' इति सूत्रं नियमयति यत् भिन्नफलत्वात् संज्ञानाम् एकत्र प्राप्तौ एका एव संज्ञा यथा स्यादिति ।

एवमेव महर्षिणा पाणिनिना एकासंज्ञाधिकार: अष्टाध्याय्यां विवेचित: इति शम्।

**टिप्पणी -**

१. अष्टा. १.३.११ २. अष्टा. १.४.५६

३. अष्टा. १.४.१ ४. अष्टा. २.२.३८

५. अष्टा. २.४.२

६. आभ्यामेव बाधसिद्धिस्तु न; तव्यदादौ कृत् - कृत्यप्रत्ययसंज्ञशदीना........ संज्ञाविषयेऽप्रवृत्तेश्च ल.श.शे. पृ.२२०

७. सि. कौ. पृ. - ५०८

८. अष्टा. १.४.१८

९. अष्टा. १.४.१७

१०. अष्टा. १.१.४३

११. अष्टा. ६.४.१४०

१२. महाभाष्यम्, सूत्रस्थभाष्यम्, पृ. १९१

**सन्दर्भग्रन्थाः**

१. अष्टाध्यायी - पाणिनिः - चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५।

२. वैयाकरण सिद्धान्तकौमुदी - भट्टोजिदीक्षितः, प्रथमभागः, चौखम्बासुरभारतीप्रकाशन, २०१३।

३. व्याकरणमहाभाष्यम् - पतञ्जलिः-संपादकः पं. शिवदत्तशर्मा, द्वितीयभागः, चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९८८।

४. लघुशब्देन्दुशेखरः, नागेशभट्टः, सं प्रो. बालशास्त्री, द्वितीयभागः, चौखम्बा सुरभारती प्रकाशन, वाराणसी-२०१३।

**वरिष्ठाचार्यः,**

**सर्वकारीयमहिलामहाविद्यालयः,पुरी**

# स्त्रियामित्यधिकारसूत्रविमर्शः

*डॉ. पूर्णचन्द्रपाढी*

भगवता पाणिनिना सूत्रात्मकं अष्टाध्यायीनामकं व्याकरणग्रन्थरत्नं प्रणीतम्। तत्र षड्विधानि सूत्राणि विद्यन्ते। संज्ञा - परिभाषा-विधि-नियमातिदेशाधिकाररूपाणि प्रसिद्धानि। स्त्रियामिति अधिकारसूत्रम् । इदं समर्थानां प्रथमाद्वा इति यावत् अधिक्रियते। इदन्तु अष्टाध्याय्यां चतुर्थाध्यायस्य प्रथमपादस्य तृतीयं सूत्रम्। अत्र 'ङ्याप्प्रातिपदिकात्[१]' इति अधिक्रियते। अत्र अंशद्वयम् - ङ्याप् इति प्रातिपदिकात् इति। ङ्याप् इत्यत्र ङी + आप् इति। ङी-ङीष्, ङीष्, ङीन् इत्येतेषां ग्रहणम्, आप् - टाप् डाप् चाप् इति एतेषां ग्रहणं भवति। परन्तु अत्र प्रातिपदिकात् इत्येव अधिकारः। तत्र अधिकारो नाम - स्वस्थले वाक्यार्थबोधाजनने सति स्वानन्तरवर्ति विध्युपकारकत्वं अधिकारत्वम्। अनया रीत्या स्त्रियामिति अधिकारसूत्रस्य समर्थानां इति यावत् अधिकारः। एवं च अयमर्थः प्रातिपदिकात् स्त्रियाम् वक्षमाणाः प्रत्ययाः प्रवर्त्तन्ते इति ।

तत्र स्त्रियामिति चेत् स्त्रीशब्दस्य सप्तम्यां स्त्रियामिति । किं स्त्रीत्वं नाम इति जिज्ञासायां भाष्ये उक्तम् -

लोकतः एते शब्दाः प्रसिद्धाः - स्त्री-पुमान् नपुंसकमिति [२]। अर्थात् शास्त्रप्रसिद्धाभावेऽपि लोकप्रसिद्धत्वात् का नाम स्त्री इति शंका जायते। तत्र लोके -

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरम् यच्च तदभावे नपुंसकम् [३]।। इति।

अर्थात् - स्तनौ केशाः यस्याः सा स्त्री इति । यस्मिन् लोमानि भवन्ति सः पुरुषः। उभयं स्त्रीत्वपुंस्त्वरूपं यत्र भवति यत्र च न भवति एतत् अन्तररूपं नपुंसकम् इति।

यथा लोके तथैव शास्त्रेऽपि लौकिकलिङ्गलक्षणमाश्रितुं न शक्यते। यतो हि शास्त्रे रमा, लक्ष्मी इत्यादिरूपाणि लौकिकवत् स्त्रीत्वं भवितुमर्हति परन्तु। खट्वा - इत्यादौ न सम्भवति लौकिकलिङ्गलक्षणस्याभावात्। पुंलक्षणेऽपि वृक्षे अव्याप्तिः। अतः अत्र लौकिकलिङ्गलक्षणं न स्वीकर्त्तुं शक्यते ।

अत्र लौकिके लिङ्गलक्षणे स्तनकेशवती स्त्री इत्यत्र स्तनौ केशाः अतिशयने यस्याः सन्ति इति विग्रहे स्तनकेशवतीति, तथैव लोमशः पुरुषः इति अत्रापि अतिशयनार्थे शप्रत्ययः। उभयं अन्तरं नाम स्तनलोम्नोः सादृश्यं यत्र तत् नपुंसकम्। एवं सति अव्ययेषु तिङन्तेषु च तदभावात् तत्र नपुंसकं स्यात् । इति अतिव्याप्तिः। इति चेत् यत्र व्यक्तिविशेषे एतादृशमुभयोमन्तरं लोके तत्रैव नपुंसकत्वव्यवस्था ।

एवं च लौकिकलिङ्गाश्रयणे भ्रुकुंसे टाप् प्रसज्यते[४]। भ्रुकुंसो नाम स्त्रीवेशधारी पुरुषः। तस्य च स्तनौकेशाः च अलंकरणे आरोपः भवति ।

नित्ययोगे मतुप् प्रत्ययः इति न वक्तुं नशक्यते। यतो हि स्त्रीवेषधारीपुरुषस्य दर्शनं भवति । तेन

जनानां मनसि स्त्रीत्वप्रकारकं ज्ञानं भवति ।

एवं सति यस्या: स्त्रिय: केशकर्त्तनानन्तरं केशा: न सन्ति तत्र स्त्रीत्वं न स्यात्।

एवं लोमश: इति कथनेन खरकुटी: इत्यत्र पुंसि प्रसज्येत। खरकुटी नाम नापितस्य गृहम्। तत्र लोमानि सन्ति। तेन द्वितीया बहुवचने नत्वादेश: स्यात् । एवं खट्वावृक्षौ न सिध्यत: इति[५] ।

तत्र समाधानं - असत्तु मृगतृष्णावत् । यथा मृगतृष्णायां जलं न भवति । अत्र असत्यजलस्वरूपा मृगतृष्णा। तथैव खट्वायां वृक्षे च स्त्रीपुंस्त्वत्वेन भाषेते। एवं च वाह्यपदार्थानां तथैव ज्ञानं भवति । बौद्धपदार्थ: अपि स्वीकार्य:। उक्तं च पतञ्जलिना[६] -

विप्र पृथ्वादि चित्तस्थं न बहिष्ठं कदाचन ।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ।। २ ।।
मृगतृष्णायामुदकं शुक्तौ रजतं भुजंगमो रज्ज्वा ।
वैभिरिकचन्द्रयुवापत् भ्रन्तमखिलं जगद्रूपम् ।।

तथैव गन्धर्वनगरं यथा । वास्तवेन यथा गन्धर्वनगरी नास्ति । बुद्धौ तद् गृह्यते। तथैवात्र खट्वादौ बुद्धौ लिङ्गग्रहणं कर्त्तव्यम् ।

हरिणापि प्रोक्तम्[७] -

यथा सलिलनिर्भासो मृगतृष्णासु जायते।
जलोपलब्ध्यनुगुणाद् बीजाद् बुद्धिर्जलेऽसति ।।
तथैवाव्यपदेश्येभ्यो हेतुभ्यस्ताटकादिषु ।
मुख्येभ्य इव लिङ्गेभ्यो भेदो लोके व्यवस्थिता ।।

एवमेव भ्रान्तिं स्वीकृत्य खट्वावृक्षौ सिध्यत: ।

एवमेव आदित्यमतिवत् सिद्ध्यति [८]। यथा आदित्यगति: सती नोपलभ्यते। तत्वद् खट्वावृक्षौ सल्लिङ्गे नोपलभ्येते । अत्र टाबादि द्वारा लिङ्गं भवति इति ज्ञायते।

'वस्त्रान्तर्हितवच्च तत्[९]' एवं च वस्त्रान्तर्हितानि द्रव्याणि यथा न ज्ञायते। तथैव खट्वादौ अन्तर्हितं लिङ्गं वर्तते। परन्तु न ज्ञायते । षड्भि: प्रकारै: सतां भावानामनुपलब्धिर्भवति - अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वाद्, इन्द्रियदौर्वल्यति। अतिप्रमादादिति ।

अतोऽत्र कश्चित् हेतु: द्रष्टव्य: येन खट्वावृक्षयो: सल्लिङ्गं नोपलभ्यते। तत्र तटादिषु सर्वाणि लिङ्गानि भवन्ति। तट:, तटी, तटमिति । यदि कश्चन पुं भवति चेत् स्त्रीनपुंसके न भवत:। न च काचित् स्त्रीचेत् अन्यद्द्रव्यं भवति । तस्मत्। एकस्मिन् द्रव्ये विरोद्धात् न सर्वलिङ्गसम्भव:। दारादय अपि अत्र प्रमाणम् तस्मात् वैयाकरणेन लौकिकं लिङ्गं आस्थातुं शक्यम्। अवश्यं कश्चन सिद्धान्त: आस्थेय: इति भाष्यकारस्य मतम् ।

कोऽसौ कृतान्त इति प्रश्ने उक्तम् -

'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्तत:[१०]'

संस्त्याने स्त्याये ड्रट् - स्त्री । (तिरोभाव:)

स्यायते अस्यां गर्भ: इति स्त्री। अधिकरण साधन: सूत्रे: सप् प्रवसे पुमान् । (आविर्भाव:) अपत्यं जनयतीति पुंमान् - कर्तृसाधन: शास्त्रे तु द्वयमपि भावसाधनम्।

सत्त्वादीनां गुणानां आविर्भाव: तिरोभाव: साम्यावस्था भवति । उक्तं च -

गुणानां परमं रूपं न दृष्टिपथमृच्छति । भर्तृहरिणा प्रोक्तम्[११] -

प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते ।
आविर्भाव: तिरोभाव: स्थितिश्चेत्यथ भिद्यते ।।
संनिधाने निमित्तानां किंचिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ।।
भावतत्त्वविद: शिष्टा: शब्दार्थेषु व्यवस्थिता:।
यद्यद्धर्मेऽङ्गतामेति लिङ्गं तत्तत्प्रचक्षते ।।

एवमेव अचेतनखट्वावृक्षादिसाधारणं लिङ्गं तु सत्वादीनां गुणानामुपचयापचयस्त्रितिरूपं क्रमेण पुं-स्त्री-नपुंसकाख्यम्। तत्र त्रयाणां वृद्धि: पुंस्त्व, अपचय: रूपम् - स्त्रीत्वम्। त्रयाणां च साम्यवस्था नपुंसकम् । यथा मृदुपचति। स्तोकं पचति ।

अत्र भूषणकार: कौण्डभट्ट:[१२] वदति - सत्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, अधिक्यं पुंस्त्वम्, अपचय:, स्त्रीत्वम्। तच्छब्दनिष्ठं तत्तत्वाच्यं च तमेवविरुद्धधर्म्यंमादाय तटादिशब्दा: भिद्यन्ते। इति। अत्र शब्दनिष्ठत्वमङ्गीकृतं लिङ्गस्य कौण्डभट्टेन। परन्तु नागेशो नाङ्गीक्रियते।

कौण्डभट्टस्य आशय: - स्तनकेशवतीत्यादिलक्षणं तु शास्त्रेऽपि स्वीक्रियते। खट्वादौ स्त्रीत्वारोपेन टाबादय:, भवन्ति इति। केषांचित् मतम्। लिङ्गानुशासनात् द्रष्टव्य:, रात्राह्ना: पुंसि।

यथा रामशब्द: अकारान्त: पुंलिङ्ग: शब्द: इति शब्दनिष्ठत्वेन प्रतिपादित:। शब्दे पुंलिङ्गस्य विशेषणत्वं विद्यते नार्थे ।

परन्तु नागेश:[१३] कथयति नैतत् समीचीनम् तत्र उपचारात् शब्दे अर्थो उपचारत्वेन भवति। तेन रामशब्दे लिङ्गत्वं नास्ति । अर्थे एव लिङ्गं भवति लक्षणया।

पुमान् लिङ्गं यस्मात् प्रतीयते स: पुंलिङ्गा:

स्त्री लिङ्गं यस्मात् प्रतीयते स: पुंलिङ्गा:

नपुं. लिङ्गं यस्मात् प्रतीयते स: पुंलिङ्गा:

एवं रीत्या व्युत्पत्ति: भवति ।

किं च तस्मात्रृछशो इत्यादि सूत्राणि प्रमाणानि। रामान् इति सिद्धौ। रामान् वत् वृक्षान् इति अत्रापि नत्वं विधीयते।

आङो नाऽस्त्रियाम् । हरिणा ।

'ह्रस्वो नपुंसक प्रातिपदिकस्य' इति अत्र शास्त्रेऽपि तत् भवति ।

एवंच यत्र लौकिकलिङ्गस्य असंभवं भवति तत्र शस्त्रीयं कार्यं शास्त्रीये उक्ते एव भवति। अपि च शास्त्रीयविशिष्टलौकिक लिङ्गं स्वीकर्त्तव्यम् । शास्त्रीयमपि शब्दतो बुद्ध्यते। तथानुभवात्[१४]। अत: केनचित् शब्देन किञ्चित् वस्तु एकैकविशिष्टमेव। केनचित् पर्यायेन लिङ्गद्वयविशिष्टं केनचित् लिङ्गत्रयविशिष्टमिति लिङ्गानुशासनात् द्रष्टव्यम्। आदि इति कथनेन - कोषात् शिष्ट/वृद्धव्यवहारात् इति च । एवमेव विवक्षाधीनं लिङ्गम्।

**सन्दर्भग्रन्था:**


१. अष्टाध्यायी - पाणिनि:, चौखम्बासुरभारती प्रकाशनम्, वाराणसी, २००५।

२. परिभाषेन्दुशेखर: - नागेशभट्ट:, व्याख्याकार: श्रीविश्वनाथमिश्र:, चौखम्बासंस्कृत-प्रतिष्ठानम्, दिल्ली।

३. लघुशब्देन्दुशेखर:, नागेशभट्ट:, सम्पा. प्रो. बालशास्त्री, द्वितीयभाग:, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी - २०१३।

४. वाक्यपदीयम्, (अम्बाकर्त्रीसहिता) भर्तृहरि:, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी, १९७७।

५. वैयाकरणभूषणसार:, (प्रभादर्चणयुत:) कौण्डभट्ट:, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २०११।

६. वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षित:, व्याख्याकार:, गोविन्दाचार्य:, तृतीयभाग:, चौखम्बासुरभारती प्रकाशनम्, वाराणसी, २०१६।

७. वैयाकरणसिद्धान्तलघुमञ्जूषा, नागेशभट्ट:, सम्पादक:, प्रो. कपिलदेवशास्त्री, विशाल-प्रकाशनम्, विश्वविद्यालयपरिसर:, कुरुक्षेत्रम्, १९८५।


**पाददटिपणी -**

१. अष्टाध्यायी, ४.१.२
२. महाभाष्यम् - चतुर्थभाग:, पृ. २६
३. तत्रैव, पृ. २७
४. तत्रैव, पृ. १७
५. तत्रैव, पृ. १८
६. तत्रैव, पृ. १९
७. तत्रैव, पृ. १९
८. तत्रैव
९. तत्रैव
१०. तत्रैव, पृ. २२
११. तत्रैव, पृ. २५
१२. वै. क. भू. सा., पृ.
१३. ल. श. शेखर, पृ. ५२०-२१
१४. तत्रैव


सहाचार्य:, स्नातकोत्तर व्याकरणविभाग:,
श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, श्रीविहार:, पुरी

# अनभिहितसूत्रानुशीलनम्

*डॉ. युधिष्ठिरसाहुः*

संस्कृतवाङ्मये प्रत्ययान्वितानि पदानि विद्यन्ते प्रत्ययान्वितं विना तेषां साधुत्वं प्रयोगार्हत्वं च न जायते । ''सुप्तिङन्तं पदम्[१]'' ''अपदं नैव प्रयुञ्जीत'' चेत्यादिवचन-प्रामाण्यात् ज्ञायते। ''ङ्याप्प्रातिपदिकात्[२]''इति सूत्रानुसारं ङ्यन्ताम् आबन्तात् प्रातिपदिकाच्च सुपः भवन्ति। ''भूवादयो धातवः[३]'' ''धातोः'' चेत्यादिसूत्रमधिकृत्य तिङो विधीयन्ते। ततः पदानां यथार्थरूपं संजायते।

तथापि परिशीलनेन ज्ञायते यत् विभक्तिविधानार्थं सूत्रकारेण अपूर्वं कौशलमवलम्बितम्। कारकाधिकारसाकम् अभिहितानभिहितव्यवस्थां स्वीकृत्य विभक्तयो जायन्ते। तदर्थं कारकप्रसङ्गे अष्टाध्यायाम् ''अनभिहिते''[४] (२.३.१) इति अधिकारसूत्रस्य पाठः दृश्यते। ततः प्रश्नः जायते किमर्थम् एतादृशं सूत्रं पठितम् ? तदभावे का हानिः ? किमस्य सूत्रस्य प्रयोजनम् ? चेत्यादीनाम् आशङ्कानां समाधानार्थं शोधपत्रमिदं प्रस्तूयते।

**१.०.०. ''अनभिहिते'' इति पदस्य व्युत्पत्तिः**

'अभि'इति उपसर्गपूर्वकात् 'धा' - धातोः क्तप्रत्यये ''दधातेर्हिः [५]'' - सूत्रेण 'धा' इत्यस्य स्थाने 'हि' - आदेशे ''अभिहित'' इति प्रातिपदिकं निष्पद्यते। ततः नपुंसकलिङ्गे सप्तम्येकवचने ''अभिहिते'' इति पदं जायते। ततः ''न अभिहितम्'' अनभिहितं, तस्मिन् ''अनभिहिते'' इति पदं साधुत्वं भजते।

**२.०.० अभिहितपदस्यार्थः पर्यायश्च**

अभिहितपदस्यार्थो भवति प्राधान्येन कथनम्। ''क्रियान्वितप्रत्ययद्वारा अन्वितत्वम् उक्तत्वम्'' इति व्युत्पत्त्या क्रियान्वितप्रत्ययः येनान्वेति तदुक्त प्रधानं वा। अत एव अभिहितपदस्य पर्यायेण उक्तं, कथितम्, अभिधान चेत्यादीनि गृह्यन्ते ।

यस्मिन् अर्थे प्रत्ययः स उक्तः। अर्थात् कत्रर्थे क्रियायां प्रत्ययविधौ कर्त्तुः उक्तत्वं जायते। कर्मार्थे प्रत्ययविधौ कर्म उक्तं भवेत् भावार्थे प्रत्ययेकृते सति भावस्य अर्थात् क्रिया प्राधान्यं संजायते ।

**३.०.० अस्य सूत्रस्य प्रवृत्तिः फलञ्च**

विभक्तिविधानं द्विधा जायते। कारकमधिकृत्य कृता विभक्तिः कारकविभक्तिः। उपपदमभिलक्ष्य कृता विभक्तिः उपपदविभक्तिः । सूत्रमिदं कारकविभक्तिषु प्रसज्यते । उपपदविभक्ति अस्य प्रवृत्तिर्नास्ति ।

द्वितीयादीनां विभक्तीनां विधानप्रसङ्गे षष्ठीविभक्तिमतिरिच्यास्य सूत्रस्य प्रवृत्तिः जायते। कर्मादिकारकाणामनभिहिते द्वितीयादयः विभक्तयः विधीयन्ते । यथा -

| **कारकम्** | **अनभिहिते** | **विभक्तिः** |
|---|---|---|
| कर्म | अनभिहिते | द्वितीया |

| | | |
|---|---|---|
| करणम् | अनभिहिते | तृतीया |
| संप्रदानम् | अनभिहिते | चतुर्थी |
| अपादानम् | अनभिहिते | पञ्चमी |
| अधिकरणम् | अनभिहिते | सप्तमी |

तत्र षष्ठीविभक्ते: कारकत्वाभावात् सूत्रमिदं न प्रवर्त्तते ।

अभिहितेतु कर्मादिनां कारकाणां प्रथमा विभक्ति: जायते । यथा -

(१) देवदत्त: विद्यालयं गच्छति ।

देवदत्तेन विद्यालय: गम्यते - कर्मोक्तम्

(२) स: कलमेन लिखति ।

तल्लेखनीय: कलम: - करणोक्तम्

(३) विप्राय गां ददाति

गौर्दानीय: विप्र: - सम्प्रदानोक्तम्

(४) वृक्षात् फलं पतति -

फलपतित: वृक्ष: - अपादानोक्तम् ।

(५) स: गृहे तिष्ठति -

तस्य स्थानीयं गृहम् - अधिकरणोक्तम् ।

**४.०.० अस्य सूत्रस्याधिकारपक्षविचार:**

अनभिहिते इति अधिकारसूत्रम्। उत्तरत्र सूत्रं संवध्यते । विधिसूत्रैकवाक्यतयाबोध-जनकत्वम्। अपि च स्वदेशे वाक्यार्थवोध्यमुत्तरोत्तरोत्तरसूत्रेषु स्वघटकपदसंपर्कमधिकारसूत्रम्।

अष्टाध्यायां प्रथमाध्यायस्य चतुर्थपादे □त्रयोविंशतिक्रमे ''कारके''[६] (१.४.२३) इति कारकाधिकार: कृत:। अस्य कारकसंज्ञाग्रहणं चतुर् पञ्चाशत् अर्थात् ''स्वतन्त्र: कर्त्ता[७]'' (१.४.५४) सूत्रपर्यन्तं जायते। यतोहि तस्मात् परं ''तत्प्रयोजकहेतुश्च'' इत्यादि क्रमेण व्यवहिताश्च[८] (१.४.८२) सूत्रं यावत् अस्य प्रयोजनं नाङ्गीक्रियते। तत: कर्मप्रवचनीय संज्ञा सूत्रम् ''इति भावेन विरामोऽवसानम्''[९] (१.४.११०) सूत्रस्य पाठात् परं पादोऽयं समाप्यते।

द्वितीयाध्यायस्य प्रथमपादे समर्थ: पदविभक्त इति सूत्रं पठित्वा समासप्रसङ्ग: प्रारभ्यते। कारा: कर्मधारये[१०] (२.२.३८) समासाधिकार: समाप्यते । तत: अनभिहित सूत्रस्याधिकार: पठ्यते। यस्य परिसमाप्ति: द्वितीयाध्यायस्य तृतीयपादान्तं यावत् प्रचलति । पादेऽस्मिन् त्रिसहस्र विभक्ति विधायकसूत्रात्रि निबद्धानि । परन्तु मण्डुकप्लुतन्यायेन सूत्रमिदं केवलं द्वादशसूत्रं प्रति प्रयुज्यन्ते। तानि यथा -

अनभिहितानुवृत्तसूत्राणि -

१. कर्मणि द्वितीया (२.३.२)

२. तृतीया च हेश्छन्दसि (२.३.३)

३. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (२.३.१२)

४. चतुर्थी सम्प्रदाने (२.३.१३)

५. क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२.३.१४)

६. तुमर्थाच्च भाववचनात् (२.३.१५)

७. कर्त्तृकरणयोस्तृतीया (२.३.१८)

८. अपादाने पञ्चमी (२.३.२८)

९. सप्तम्यधिकरणे च (२.३.३६)

१०. कर्त्तृकर्मणोः कृतिः (२.३.६५)

११. उभयप्राप्तौ कर्मणि (२.३.६६)

१२. कृत्यानां कर्त्तरि वा (२.३.७१)

यद्यपि अस्य सूत्रस्याधिकारः द्वितीयाध्यायस्य तृतीयपादस्य प्रथमसूत्रतः अन्तिमसूत्रपर्यन्तं प्रचलति। तथापि उपर्युक्ते सूत्रेषु अस्य प्रवर्त्तनमभिलक्ष्यते। अपरेषु ६१ संख्यके सूत्रं प्रति अस्य अप्रयोजनत्वमापद्यते उपपदविभक्तिकत्वात्, उपपदविभक्तिषु अस्याप्रवृत्तनाच्च ।

**५.०.० अस्य सूत्रस्य प्रयोजनपक्षविचारः**

उपपदविभक्तौ कारकविभक्तौ च यद्यपि विभक्तिः विधीयते तथापि विभक्तिविधौ कारकत्वपक्षं संख्याविभक्तिपक्षं च विचारे पर्यायत्वेनोभयो विशेष्यविशेषणभावः संपद्यते।

५.१.०. ''कारकविभक्त्यर्थः'' इति पक्षे अस्य सूत्रस्य व्यर्थता

कारकविधायकसूत्रस्य वचनविधायकसूत्रस्य चैकवाक्यतायां कारकं विशेष्यत्वे संख्या विशेषणरूपेण चार्थाभिव्यजने कारकविभक्तिपक्षः आपद्यते। यथा -

''कर्तृरीप्सिततं कर्म[११]'' ''कर्मणि द्वितीया[१२]'' - द्वयेकयोद्विवचनैकवचनम्[१३]। बहुषु बहुवचन[१४] वा सूत्राणामेकवाक्यतायां कर्मसंज्ञकस्य पदस्य एकत्व-द्वित्व-वहुत्वर्थपरिप्रकाशे द्वितीयायाम् एकवचने अम्, द्विवचने औट् बहुवचने 'शस्' चेति प्रत्ययाः विधीयन्ते। अस्मिन् स्थले कारकादीनां पदानां विशेष्यत्वेन अर्थाभिव्यक्तौ विभक्तिः विधीयते । अत एव तदर्थम् ''अनभिहिते'' इति अधिकारसूत्रपाठस्य प्रयोजनं न स्वीक्रियते।

५.२.०. संख्याविभक्त्यर्थः इति पक्षे अस्याधिकारस्यावश्यकत्वम्

यदा कारकविधायकसूत्रं संख्याविधायकसूत्रं चैतयोः एकवाक्यतायां संख्याविधायकसूत्रं विशेष्यत्वेन प्रवर्त्तते । तदा ''संख्याविधायकसूत्रं विशेष्यत्वेन प्रवर्त्तते।'' तदा ''संख्याविभक्त्यर्थः'' इति पक्षः अवधार्यते। यथा - द्वितीयायां अम् - औट्-शस्-प्रत्ययानां विधानार्थं कर्मसंज्ञा अपेक्षते। अत एव अमादीनां प्रत्ययानां विशेष्यत्वं कर्मसंज्ञाविधायकसूत्रस्य विशेषणत्वं च बोध्यते। अय हि ''संख्याविभक्तिपक्षः'' इति विचार्यते।

एवमपि ''कृत: कट:'' इत्यादौ क्तप्रत्ययेन कर्ममात्रोक्तावपि तदेकत्वस्य अनुक्तत्वात् अम् विभक्ति: प्राप्नोति । अत: तद्वारणाय (द्वितीया विभक्तिवारणाय) अनभिहिताधिकार कर्त्तव्य:।

**संदर्भटिप्पणी**

१. अष्टाध्यायी सू. सं. (१.४.१४)

२. महाभाष्योक्ति:

३. अ.सू.सं. (४.१.१)

४. अ.सू.सं. (१.३.१)

५. अ.सू.सं. (२.३.१)

६. अ.सू.सं. (७.४.४२)

७. अ.सू.सं. (१.४.२३)

८. अ.सू.सं. (१.४.५४)

*संस्कृतविभाग:,*
*रेभेन्सा विश्वविद्यालय:,*
*कटकम्, ओडिशा*

# असिद्धवदात्राभात् इत्यधिकारसूत्रविमर्शः

*डॉ. हरेकृष्णपट्टजोषी*

दलितशशिकाराभा दिव्यकुन्दावदाता
दलदमृतजवक्त्रा दैवतैर्दीव्यमाना ।
दुरितदलनदक्षा दीर्णजाड्या च दिव्या
द्यतु मधुमयवाचां देवता दुष्टतां नः।।

महामुनिपाणिनिप्रणीताया अष्टाध्याय्याः षष्ठाध्यायस्य चतुर्थपादे द्वाविंशतितममिदं प्रकृतम् असिद्धवदत्राभात् इति सूत्रम्। वैयाकरणसिद्धान्तकौमुद्यां भवतेर्लिटि रूपसाधनावसरे समुपन्यस्तं सूत्रमिदं श्रीमता भट्टोजिदीक्षितेन।

## १. किमिदं सूत्रम्

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।

इत्यभियुक्तोक्तिः। परन्तु सूत्रलक्षणस्य षड्विधत्वाभावाद् इदं न युक्तम्। षट्विधं सूत्रमुच्यते इत्येव तु सांप्रदायिकः पाठः। लक्षणशब्दस्य स्वरूपपरत्वे तु यथोक्तं न दुष्टम्। षड्विधेषु पाणिनीयसूत्रेषु इदमधिकारसूत्रमिति सिद्धान्तः। किमत्र प्रमाणमिति चेत्? असिद्धवद् इत्ययमधिकारः इति काशिकाकारस्य, अधिकारश्चायम् इति प्रौढमनोरमाकारस्य, समानानुपूर्वीकं वाक्यं तत्त्वबोधिनीकारस्य, प्रकाशव्याख्याकृतः श्रीकृष्णपण्डितस्य, अधिकारसूत्रमिदमुत्तरत्र श्नान्नलोप इत्यादौ प्रतिसूत्रमुपतिष्ठते इति बालमनोरमाकारस्य वचनमत्र प्रमाणम् ।

## २. ननु कोऽयमधिकारशब्दार्थः?

अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यते इति व्युत्पत्त्या अधिपूर्वात्करोतेः अकर्तरि च कारके संज्ञायाम् ३.३.१९ इति कर्मणि घञा निष्पन्नोऽयमधिकारशब्दः घञजबन्ताः पुंसि इति लिङ्गानुशासनोक्तेः पुंसि वर्तते। उत्तरोत्तरगमनमधिकार इति अधिकारसामान्यलक्षणम्। उत्तरोत्तरगमनं कदाचित् संपूर्णस्य सूत्रस्य भवति। यथा धातोः ३.१.९१ अङ्गस्य ६.४.१ इत्यादेः। कदाचित् सूत्रांशपदस्य यथा - इको यणचि ६.१.७७ इति सूत्रगतस्य अचि इत्यस्य पदस्य आद्गुणः ६.१.८७ इति सूत्रे समागमनम्। कदाचित् पदैकदेशस्य यथा झोऽन्तः ७.१.३ इति सूत्रे आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७.१.२ इत्यस्य प्रत्ययांशः।

अधिकारस्य निर्दुष्टलक्षणं परिभाषेन्दुशेखरस्य भूतिटीकायामेवमुच्यते - स्वदेशे लक्ष्यसँस्कारोपयोगि (लक्ष्य-धर्मिक-साधुत्व-प्रकारक-बोधोपयोगि) विधिशास्त्रीयवाक्यार्थ-बोधोपकारक-वाक्यार्थ-अननुभावकत्वे सति विधिशास्त्रीयलक्ष्यसँस्कारोपयोगि-वाक्यार्थबोध-प्रयोजकत्वम् अधिकारत्वम् इति।

स्वदेशे लक्ष्य-संस्कारक-शाब्दबोधाजनकत्वे सति उत्तरशास्त्रेण सह एकवाक्यतया बोधोपयोगित्वम् अधिकारत्वम् इति श्रीरामप्रसादत्रिपाठिनः वदन्ति।

**३. अधिकारसूत्रस्य अवधिविवेचनम्**

स्वरितेनाधिकारः १.३.११ इति सूत्रम् अधिकारपरिमाणज्ञानार्थम् आवश्यकम्। तथा हि स्वरितेनाधिकार इति सूत्रस्वरूपम्। स्वरितं दृष्ट्वा अधिकारो न भवति इति तदर्थः। अत्र कैयटः प्रकृतस्य अधिकारनिवृत्तये शब्दान्तरस्य स्वरितत्वं प्रतिज्ञायते। तेन विंशतिकात्खः ५.१.३२ इत्यत्र स्वरितत्वदर्शनात् द्वित्रिपूर्वान्निष्कात् ५.१.३० इत्यस्य निवृत्तिरनुमीयते।

तदुक्तं समर्थः पदविधिः २.१.१ इति सूत्रे नागेशेन - स्वरीतत्वप्रयुक्ताधिकारेण उत्तरत्र तत्तत्पदोपस्थितिः अधिकारान्तरं दृष्ट्वा व्याख्यानाद् वा निवृत्तिश्च इति।

अत एव भाधिकारमभिव्याप्य सूत्रस्य अवधिवर्तते इत्यवगम्यते। भाधिकारस्य अवधिज्ञानं तु अङ्गस्य ६.४.१, प्रत्ययः ३.१.१, परश्च ३.१.२ इत्यादौ इव व्याख्यानेनैव सिध्यतीति। तेन प्रकृतसूत्रस्य अधिकारः ऋत्व्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि च्छन्दसि ६.४.१७५ इति सूत्रपर्यन्तं विलसति। भाधिकारमभिव्याप्य सूत्रमिदमधिक्रियते इत्यस्मिन् विषये बृहच्छब्देन्दुशेखरे नागेश आह-अत्र च सूर्यतिष्याऽगस्त्यमत्स्यानां य उपधायाः ६.४.१४९ इति अत्रत्यं उपधाग्रहणं ज्ञापकमिति तत्रैव निरूपितम् इति। तस्मिन्नपि सूत्रे (६.४.१४९) तेनोक्तम्-एतदेवोपधाग्रहणं ज्ञापयति-भाऽधिकारमभिव्याऽऽभीयाऽसिद्ध-त्वमिति इति। प्रकृतसूत्रे सूर्यतिष्येत्यत्र च उद्योतकारः समं सिद्धान्तमुक्तवान्। (वस्तुत उपधाग्रहणमेव भाधिकारमभिव्याप्यायमधिकार इत्यर्थे मानमिति बोध्यम्। एवं च इदमेवोपधाग्रहणं सह तेनासिद्धत्वे ज्ञापकमिति भावः।

**४. सूत्रस्य अतिदेशत्वं सम्भवति न वा ?**

अतिपूर्वाद् अतिसर्जनार्थकाद् दिश्-धातोः भावे घञि अतिदेशशब्दो निष्पद्यते।
अतिदेशो नाम ये परत्र विहिताः धर्माः तमतीत्य अन्यत्र तेषां देशः इति शावरभाष्यकृत् । अन्यत्र अन्यधर्मपरिप्रापणमतिदेशः (पृ.३७) इति वाक्यपदीयटीकाकृत्पुण्यराजः। तान्यतिदेशसूत्राणि पाणिनीये द्वेधा प्राप्यन्ते। वतिप्रत्ययान्तघटितानि, तदघटितानि च। प्रकृतसूत्रस्य वतिप्रत्ययान्तघटितत्वेन अतिदेशत्वं सिद्धम्। पुनरपि कार्यरूपनिमित्तादिभेदेन सत्यपि अतिदेशस्य नैकविधत्वे अभावातिदेशः अन्यतमः। क्वचिद् विद्यमानस्य धर्मस्य, क्वचिल्लक्ष्ये प्रवृत्त्युन्मुखस्य शास्त्रस्य कार्यस्य वा निवृत्तेः अभावस्य अतिदेशनम् अभावातिदेशः। येन सूत्रेण अभावातिदेशः क्रियते, तदपि अभावातिदेशपदेन व्यवह्रियते।

**५. पदच्छेदः**

असिद्धवत् अत्र आ भात् इति सूत्रस्यास्य पदविभागः। तेनेदं सूत्रं पदचतुष्टयात्मकं भवति । सूत्रे आ भात् इति असमस्तं भिन्नं पदम्। यद्यत्र आङ् मर्यादाभिविध्योः २.१.१३ इति अव्ययीभावसमासः स्यात् तदा आभम् इति समस्तं पदं स्यात्। अर्थे तु अविशेषः बोध्यः।

**६. पदार्थकथनम्**

असिद्धवत् - असिद्धेन तुल्यं वर्तते इति विग्रहे तृतीयान्ताद् असिद्धशब्दात् तुल्यमित्यर्थे तेन तुल्यं क्रिया चेद्वतिः ५.१.११५ इति वतिप्रत्यये (वतिः इकारेत्) प्रक्रियाकार्ये प्रोक्तं रूपं साधु। अनेन तुल्या

क्रिया इत्यर्थे वतेर्विधानात् का अत्र क्रिया इति जिज्ञासायां वर्तते इति अवगम्यताम्। अत्र असिद्धशब्देन असिद्धकर्तृकवर्तनं लक्ष्यते। तेन असिद्धकर्तृक-वर्तनतुल्यं सिद्धकर्तृकवर्तनमिति बोध: पर्यवस्यति। असिद्धवद्घटक: सिद्धशब्द: परिनिष्पन्नवचन:। यथा सिद्ध ओदन:, सिद्ध: सूप: इत्यादौ सिद्धशब्द उपर्युक्तार्थक: तद्वत्। न सिद्धम् असिद्धम् इति। यत् सिद्धमपि सिद्धकार्यं न करोति तदसिद्धमित्यर्थ:। असिद्धेन तुल्यमिति उच्यमाने केन धर्मेण साधर्म्यमिति प्रश्ने सिद्धकार्याकरणसाधर्म्येण इति समाधिरुक्त:। तेन सिद्धं शास्त्रं सिद्धकार्याकरणसाधर्म्येण असिद्धेन शास्त्रेण समानं वर्तते इति निर्गलितोऽर्थ:।

अत्र - समानश्रयप्रतिपत्त्यर्थम् अत्रग्रहणम्। समान एक आश्रयो निमित्तं यस्य (सूत्रस्य) तत् समानाश्रयम्। समानाश्रयस्य प्रतिपत्ति: (परिज्ञानम्) समानाश्रयप्रतिपत्ति:। समानाश्रयप्रतिपत्तये इदं समानश्रयप्रतिपत्त्यर्थम् इति। तदुक्तं भाष्ये - अथ अत्रग्रहणं किमर्थम्? अत्रग्रहणं विषयार्थम्। विषय: प्रतिनिर्दिश्यते। अत्रएतस्मिन्नभाच्छास्त्रे आभाच्छास्त्रमसिद्धं यथा स्यात् इति । विषयार्थमित्यस्य व्याख्यायामुच्यते कैयटेन - विशिष्टो यो विषय: समानलक्षण: तन्निर्देशार्थम् इति।

एतद् निमित्तसप्तम्यन्तमिति बालमनोरमाकार:। सप्तमी च वैषयिकी इति शब्दरत्नकार:, बृहच्छब्देन्दुशेखरकारश्च।

समानाश्रयत्वं च असिद्धत्वाश्रय-शास्त्र-सम्बन्धि-निमित्त-समुदायान्यूनानतिरिक्ता-श्रयकत्वम्। शब्दरत्नकृन्मतेन समानाश्रयत्वञ्च तत्प्रयोग-प्राप्तासिद्धत्वाश्रय-शास्त्रीय-शब्दरूप-निमित्त-समुदायापेक्षयाऽन्यूनानतिरिक्ताश्रयत्वम् इति।

उद्योतेऽप्युच्यते-समानाश्रयत्वं च तत्तत्प्रयोगप्रौप्तासिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदाया-पेक्षयाऽन्यूनानतिरिक्ताश्रयकत्वम्। आश्रयणं स्थानित्वेनैव-निमित्तत्वेनैव-इति नाग्रह:, किन्तु यथाकथंचित्। विकारकृतमतिरिक्तत्वं तु न, जहि इत्यादे: अनुदाहरणत्वापत्ते:। ननु जहीति भाष्योदाहरणे हिलोपे जस्य निमित्तत्वम्, जादेशे च हन्तेरिति कथं समानाश्रयत्वमत आहविकारकृतमिति। एवं च जभावस्य विकारत्वेन अनतिरिक्तत्वात् तयो: समानाश्रयत्वमेवेति भाव:।

**आ भात् -** अधिकारसूत्रस्य अवधिज्ञानाय आ भाद् इति पदद्वयमनावश्यकम्। विषयनिर्देशार्थम् आ भाद्ग्रहणम्। तदुक्तं बृहच्छब्देन्दुशेखरकारेण शब्दरत्नकारेण च-आभाद्ग्रहणं विषयनिर्देशार्थम्। अवधिलाभस्तु अङ्गस्य इत्यादौ इव व्याख्यानत एव भविष्यति इति। स च विषय: आभीयं प्रति एव आभीयमसिद्धं नान्यत्प्रति इत्येवंरूप:।

प्रकृतसूत्र उद्योते उच्यते - अधिकाराद् आभीयस्य असिद्धत्वे सिद्धे आभाद्ग्रहणं आभीये कर्तव्ये इत्यर्थरूपविषयलाभार्थमिति अत्रग्रहणं समानाश्रयत्वार्थमिति भाव:।

न्यासेप्युक्तम् - अथ आभाद्ग्रहणं किमर्थम्, यावता स्वरितलिङ्गासङ्गात् अन्तरेण अपि आभाद्ग्रहणम् आ पादपरिसमाप्ते: असिद्धवद् इति अनुवर्तिष्यते? आ भाद् इति विषयनिर्देश: क्रियते-आ भसंशब्दनाद् यद् वक्ष्यते तस्मिन् कर्तव्यतया विषयभूते असिद्धवद् भवति इत्यस्य अर्थस्य परिज्ञानाय।

**७. विग्रहप्रदर्शनम्**

तत्र असिद्धवद् इति अव्ययं सुबन्तम्। तद्धितश्चासर्वविभक्तिः १.१.३८ इति सूत्रे तसिवती इति परिगणनात् वत्यन्तस्य शब्दस्वरूपस्य अव्ययत्वेन तदुत्तरविभक्तेः अव्ययादाप्सुपः २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्।

अत्र इत्यपि अव्ययं सुबन्तम्। तद्धितश्चासर्वविभक्तिः १.१.३८ इति सूत्रे तसिलादयः प्राक् पापशः इति परिगणनात् तदन्तः पातिना सप्तम्यास्त्रल् ५.३.१० इति विहितत्रलन्तस्य अत्रेति शब्दस्वरूपस्य अव्ययत्वेन तदुत्तरविभक्तेः अव्ययादाप्सुपः २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्।

आ इत्यपि अव्ययं सुबन्तम्। अत्रेदमवधेयं यत् चादयोऽसत्त्वे १.४.५७ इति सूत्रोक्तचादिगणे तथा प्रादयः १.४.५८ इति सूत्रोक्तप्रादिगणे च आकारः पठ्यते। तत्र चादिगणे अङित् आकारः तथा प्रादिगणे ङिद् आकारः पठ्यते। सूत्रगतोऽयमाकारो ङिदेव। किमत्र कारणमिति चेदुच्यते-सूत्रस्थोऽयमाकारः अभिविधौ वर्तते। तेन ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः। एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्।। इति निपात एकाजनाङ् १.१.१३ इति सूत्रोक्तभाष्यप्रामाण्यात् तेन सह इत्यर्थके अभिविधौ वर्तमानस्य आकारस्य ङित्त्वमवसेयम्।

किञ्चायमाकारः चादयोऽसत्त्वे १.४.५७ इत्यनेन निपातसंज्ञकः। तथैव आङ् मर्यादावचने १.४.८९ इति कर्मप्रवचनीसंज्ञोऽपि वर्तते। क्रियायोगाभावाद् नायमाकार उपसर्गसंज्ञकः। तथा च स्वरादिनिपातमव्ययम् १.१.३७ इति निपातत्वेन अव्ययत्वात् तदुत्तरविभक्तेः अव्ययादाप्सुपः २.४.८२ इति लुकि प्रत्ययलक्षणेन सुबन्तत्वं सिद्धम्। वाक्यस्मरणयोः अर्थयोः वर्तमानः अङित् आकारस्तु उपसर्गविभक्तिस्वरप्रतिरूपकाश्च इति चादिगणसूत्रेण निपातसंज्ञ इति अन्यदेतत्।

भात् इति पञ्चम्यन्तं सुबन्तम्। आङ् मर्यादावचने १.४.८९ इत्यत्र वचनग्रहणात् अभिविधौ वर्तमानस्य आङ् इत्यस्य गतिसंज्ञापवादभूतकर्मप्रवचनीयसंज्ञायां तद्योगे पञ्चम्यपाङ्परिभिः २.३.१० इति सूत्रेण अर्थवतः भशब्दात् पञ्चमीविधानात् प्रोक्तं रूपं साधु। भस्य ६.४.१२९ इति अधिकारम् अभिव्याप्य इति आ भात् इत्यस्यार्थः। भस्य इति अधिकारसूत्रपर्यन्तं विद्यमानप्रकरणान्तर्गतविधिरित्यर्थः।

भाष्ये - किं पुनः प्राग् भाद् असिद्धम्, आहोस्वित् सह तेन ? कुतः पुनरयं सन्देहः ? आङाऽयं निर्देशः क्रियते, आङ् च पुनः सन्देहं जनयति। तद् यथा - आ पाटलिपुत्राद् वृष्टो देव इति सन्देहः - किं प्राक् पाटलिपुत्रात्-सह तेनेति। एवमिहापि सन्देहः - प्राग्भात् - सह तेनेति । ........ अथवा पुनरस्तु सह तेन - इति। अत्र प्रदीपकृत्-प्राग् भादित्यस्य पक्षस्य प्रतिपक्षभावेन उपादीयमानाद् अभिविधौ आकारो बोद्धव्यः।

**८. वाक्ययोजना**

सूत्रे पदान्तरस्य अननुवर्तनात् आ भाद् अत्र असिद्धवत् इति सूत्रगतपदान्वयो भवति। यद्यपि असिद्धत्वाश्रयशास्त्रस्य आ भात् इति पदद्वयेन निर्देशं कुर्वता सूत्रकृता असिद्धतानिरूपकस्य शास्त्रस्य निर्देशो न विहितः तथापि प्रत्यासत्त्या आभीयमेव शास्त्रम् असिद्धतानिरूपकत्वेन अध्याह्रियते।

## ९. सूत्रार्थप्रदर्शनम्

समानाश्रयम् भाधिकारमभिव्याप्य विद्यमाने कस्मिंश्चित् शास्त्रे कर्तव्ये समानाश्रयमाभीयं शास्त्रं सिद्धमपि प्रवृत्तमपि असिद्धवत् अप्रवृत्तवद् भवति।

पदमञ्जरीकारोऽत्राह-श्नान्नलोपः इत्यारभ्य आ पादपरिसमाप्तेः यानि सूत्राणि तानि अन्योऽन्यस्मिन् असिद्धवद् भवन्ति, तानि चेत् तुल्यनिमित्तानि इति।

सिद्धान्तकौमुद्यां दीक्षितेन सूत्रस्य वृत्तिरेवमीरिता - इत ऊर्ध्वमापादसमाप्तेराभीयम्। समानाश्रये तस्मिन् (आभीये) कर्तव्ये तद् (आभीयम्) असिद्धं स्यात् इति । वृत्तौ तस्मिन् कर्तव्ये इत्यत्र यस्य च भावेन भावलक्षणम् २.३.३७ इति सप्तमी। ततः तस्मिन् कर्तव्ये सति इति लभ्यते। वृत्तौ आभीयमिति पदं प्रयुक्तं दृश्यते। आभे आभं वा भवम् इत्यर्थे सप्तम्यन्ताद् आभशब्दात् तत्र भवः ४.३.५३ इति भवार्थे छप्रत्यये प्रक्रियाकार्ये प्रोक्तरूपं सिद्धम्। यद्यपि आभाच्छास्त्रे भवमाभीयं तथापि सूत्रस्यापि प्रकरणैकदेशत्वेन तत्रभवत्वादिति प्रकाशकृदाह।

प्रकृतसूत्रस्य अधिकारे आर्धधातुके ६.४.४६ इति भस्य ६.४.१२९ इति च अधिकारसूत्रद्वयं क्रोडीकृतम्। तत्र आर्धधातुके ६.४.४६ इत्यस्य अधिकारे चतुर्विंशतिः (२४) सूत्राणि, भस्य ६.४.१२९ इति अधिकारे च पञ्चचत्वारिंशत् (४५) सूत्राणि विद्यन्ते। एवं साकल्येन प्रकृतसूत्राधिकारे त्रिपञ्चाशदधिकैकशतं (१५३) सूत्राणि समुल्लसन्ति। एतदधिकारसूत्रगतकार्याणि यथाक्रमम् - नलोपः (२३-३३), शास उपाधाया इकारादेशः (३४), तस्यैव च शादेशः (३५), हन्तेर्जादिशः (३६), अनुनासिकलोपः (३७-४०), अनुनासिकस्य आत्त्वम् (४१-४५), आर्धधातुके (४६) इत्यधिकृत्य भ्रस्जो रमागमः (४७), अतो लोपः (४८), यलोपः(४९-५०), णेर्लोपः(५१-५४), णेरयादेशः(५५-५७), ल्यपि निष्ठायां च दीर्घः(५८-६१), चिण्वद्भावः(६२), क्ङिति आर्धधातुके परतः दीङो युडागमः(६३), आकारस्य लोप (६४), तस्यैव च ईत्त्वम् (६५), घुमास्थादीनाम् ईत्त्वम् एत्त्वं च (६६-६९), मयतेरित्वम्(७०), अङ्गस्य अडाटावागमौ (७१-७५), इर् इत्यस्य रे इत्ययमादेशः(७६), अङ्गस्य इयङ्ङुवङ्ङादेशौ (७७-८०), यण्विधिः(८१-८७), भुवो वुगागमः(८८), उपधाया ऊत्त्वं ह्रस्वो दीर्घो लोपश्च (८९-१००), क्ङितिसार्वधातुकसम्बन्धिष्वङ्गकार्येषु हेर्धित्वम् (१०१-१०३), चिण उत्तरस्य लुग्विधिः(१०४), हेर्लुग्विधिः(१०५), प्रत्यस्योकारलोपः(१०६-१०९), करोतेः अत उत्त्वम्(११०), श्नसोरल्लोपविधिः (१११), श्नाभ्यस्तयोः आकारलोपः ईकारादेशः (११२-११३), दरिद्रस्य भियः च इत्त्वम् (११४-११५), जहातेः इत्त्वम् आत्त्वं लोपश्च (११६-११८), घ्वसोरेत्वाभ्यासलोपौ (११९), लिटि परतः एत्वाभ्यास-लोपौ (१२०-१२६), तृ इत्ययमादेशः (१२७-१२८), भस्य इत्यधिकृत्य (१२९) पादः पदादेशः, भस्याङ्गस्य संप्रसारणं लोपः टेर्लोपश्च (१३१-१४५), उकारान्तस्य भस्य गुणः लोपश्च (१४६-१४७), इवर्णावर्णान्तस्य भस्य लोपः(१४८), भस्याङ्गस्य यलोपः(१४९-१५२), भस्य छस्य लुक् (१५३), इष्ठेमेयः सु प्रत्ययेषु भस्यादेशाः (१५४-१६२), अङ्गस्य प्रकृतिभावः (१६३-१७०),

निपातनविधिश्च (१७१-१७५) इति।

**१०. सूत्रोदाहरणप्रदर्शनम्**

क. उत्सर्गलक्षणभावार्थं प्रकृतसूत्रं प्रवर्तते। अयं भावः - उत्सृज्यते आदेशेन निवर्त्यते इति उत्सर्गः नाम स्थानी। तदुक्तं प्रदीपे - उत्सर्गशब्देन सामान्यविषयत्वसाधर्म्यात् स्थानी अभिधीयते। स उत्सर्गः लक्षणं (निमित्तं) यस्य सूत्रस्य तत् सूत्रम् उत्सर्गलक्षणं सूत्रम्। तस्य भावः (प्रवृत्तिः) उत्सर्गलक्षणभावः। तस्मै उत्सर्गलक्षणभावाय इदं उत्सर्गलक्षण-भावार्थमिति।

एधि इत्याद्युदाहरणम् । तथा हि - हिंसागत्योरर्थयोः वर्तमानाद् आदादिकात् परस्मैपदिनः सकर्मकात् हन्-धातोः कर्तरि लोटि सिपि सेर्ह्यपिच्च ३.४.८७ इति सेः हिरित्यस्मिन् आदेशे हन् हि इति स्थिते शपि शब्लुकि परत्वात् हुझल्भ्यो हेर्धिः ६.४.१०१ इति सूत्रं बाधित्वा अलोऽन्त्यस्य १.१.५२ इति परिभाषया परिष्कृतेन घ्वसोरेद्धावभ्यास-लोपश्च ६.४.११९ इति सूत्रेण अन्त्यस्य सकारस्य एकारे अ ए हि इति जाते झलन्तलक्षणं धित्वं न प्राप्नोति। इदं धित्वविधायकम् उत्सर्गलक्षणं सूत्रम्। तस्य प्रवृत्त्यर्थम् एत्त्वविधायकं सूत्रं प्रकृतसूत्रेण असिद्धवद् भवति। तेन झल्(सकार)रूपनिमित्तमादाय धित्वे अ ए धि इति जाते हेरपित्त्वात् सार्वधातुकत्वाच्च सार्वधातुकमपित् १.२.४ इति ङित्त्वेन श्नसोरल्लोपः ६.४.१११ इति अकारलोपे एधि इति रूपं सिद्धम्। अत्र घ्वसोरेद्धावभ्यासलोपश्च ६.४.११९ इति, हुझल्भ्यो हेर्धिः ६.४.१०१ इति च सूत्रद्वयं समानाश्रयम् आभीयञ्च। तत्रादौ हिः परत्वेन निमित्तम् अन्ते स्थानित्वेन निमित्तम्। अतः समानाश्रये हुझल्भ्यो हेर्धिः ६.४.१०१ इति आभीये कर्तव्ये घ्वसोरेद्धावभ्यासलोपश्च ६.४.११९ इति आभीयमसिद्धवद् भवति। अत एव शास्त्रासिद्धत्वपक्षमाश्रित्य प्रौढमनोरमायामाह दीक्षितः - एधि इत्यत्र स्थानिनो झलन्तत्वबुद्धेः अनिवर्तितत्वात् तन्निमित्तं धित्वं सिध्यति इति। अत्र काशिकाकारः वदति - एधि इत्यत्र एत्वे कृते झल्लक्षणं धित्वं न प्राप्नोति, असिद्धत्वात् भवति इति।

ख. आदेशलक्षणप्रतिषेधार्थं प्रकृतसूत्रं प्रवर्तते। आदेशो लक्षणं (निमित्तं) यस्य सूत्रस्य तत् सूत्रम् आदेशलक्षणं सूत्रम्। आदेशलक्षणस्य प्रतिषेधः आदेशलक्षणप्रतिषेधः। आदेशलक्षणप्रतिषेधाय इदम् आदेशलक्षणप्रतिषेधार्थमिति ।

जहि इत्याद्युदाहरणम्। तथा हि - हिंसागत्योरर्थयोः वर्तमानाद् आदादिकात् परस्मैपदिनः सकर्मकात् हन्-धातोः कर्तरि लोटि सिपि सेर्ह्यपिच्च ३.४.८७ इति सेः हिरित्यस्मिन् आदेशे हन् हि इति स्थिते शपि शब्लुकि हन्तेर्जः ६.४.३६ इति सूत्रेण अनेकाल्त्वात् हन्तेर्जादेशे ज हि इति जाते अतो हेः ६.४.१०५ इति हेर्लुक् प्राप्नोति। इदं लुग्विधायकम् आदेशलक्षणं सूत्रम्। तस्य प्रतिषेधार्थं जादेशविधायकं सूत्रं प्रकृतसूत्रेण असिद्धवद् भवति। तेन अदन्तत्वाभावात् तन्निमित्तीकृत्य प्रवर्तमानस्य हेर्लुकोऽभावात् जहि इति रूपं सिद्धम्। अत्र हन्तेर्जः ६.४.३६ इति, अतो हेः ६.४.१०५ इति च सूत्रद्वयं समानाश्रयम् आभीयञ्च। तत्रादौ हिः परत्वेन निमित्तम् अन्ते स्थानित्वेन निमित्तम्। अतः समानाश्रये अजो हेः ६.४.१०५ इति आभीये कर्तव्ये हन्तेर्जः ६.४.३६ इति इति आभीयमसिद्धवद् भवति। अत्र काशिकाकारः वदति - जहि इत्यत्र जभावे कृते

अतो हेः ६.४.१०५ इति लुक् प्राप्नोति, असिद्धत्वान्न भवति इति।

सिद्धान्तकौमुद्यां बभूव इति लक्ष्यं प्रकृतलक्षणस्य प्राप्तिस्थलरूपेणोपन्यस्तम्। तथा हि भवतेः लिटि तिपि णलि भुवो वुकि भुव् अ इति स्थिते धातोर्द्वित्वे अभ्यासादिकार्ये बभूव् अ इति जाते भुवो वुगागमः स्यात् लुङ्लिटोरचि इत्यर्थकस्य भुवो वुग् लुङ्लिटोः ६.४.८८ इति आभीयशास्त्रस्य पूर्वं प्रवृत्तस्य अपि श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रू इत्यस्य चाङ्गस्य इयङुवङौ स्तः अजादौ प्रत्यये परे इत्यर्थके अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६.४.७७ इत्याभीये कर्तव्ये असिद्धत्वेन (बभू अ इति अवलोक्य) ऊकारस्य उवङ्ङादेशे (ब भ् उव् अ इति जाते) पुगन्तलघूपधस्य च ७.३.८६ इति लघूपधगुणे (ब भ् ओव् अ) बभोव इति अनिष्टरूपापत्तिः स्यात्। तत्परिहाराय तु वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ इति वार्तिकं समाश्रितम्।

**११. प्रत्युदाहरणप्रदर्शनम्**

क. वत्करणप्रयोजनम् - प्रतिपत्तिलाघवाय वत्करणम् इति कैयटेनोच्यते। तदुक्तं प्रदीपे - क्वचित्तु प्रतिपत्तिलाघवाय भेदोपक्रमे वतिना निर्देशः क्रियते-ब्रह्मदत्तवदयमिति। इहापि-असिद्धवदत्राभात् इति।

वत्करणं तु प्रतिपत्तिलाघवार्थमेवेति पदमञ्जरीकारो वदति।

तत्त्वबोधिनीकारेण वत्करणप्रयोजनं प्रतिपादयता निगदितं यत् - वत्करणं प्रतिपत्ति-लाघवाय भवति। तथा हि वत्करणमन्तरेण असिद्धमत्राभात् इति सूत्रस्वरूपं स्यात्। पाणिनेः सर्वाणि सूत्राणि सिद्धानि। अस्यामवस्थायां सिद्धं सूत्रजातमुद्दिश्य असिद्धमिति प्रयुज्यमानम् अनुपपन्नं सत् सामर्थ्यात् असिद्धवद् इत्यर्थमवगमयति । यथा राजभिन्ने पुरोहिते राजायमिति प्रयोगः अनुपपन्नः सन् राजवदिति अर्थं बोधयति। अत्र तु प्रतिपत्तिगौरवं (ज्ञानजनकमनो-व्यापारगौरवम्) भवति। राजवदयं पुरोहित इत्युच्यमाने तु प्रतिपत्तिलाघवमिति विशेषः। षत्वतुकोरसिद्धः ६.१.८६ इत्यत्र अगत्या असिद्धवत् इति, असंयोगाल्लिट् कित् १.२.५ इत्यत्र किद्वद् इति च कल्प्यते ।

वत्करणं सुखार्थम् । विनापि तेन (वत्करणेन) पूर्वत्रासिद्धम् ८.२.१ इत्यादौ अतिदेशदर्शनात् इति प्रकाशकार आह।

ख. आ भात् इत्यत्र यदि मर्यादायाम् आङ् स्वीक्रियते तदा भाधिकारात् प्राक् मघवा बहुलम् ६.४.१२८ इति सूत्रपर्यन्तम् प्रकृतसूत्रस्य अधिकारः कल्पनीयो भवेत्। तेन भाधिकारोक्तसूत्राणि सपादसप्ताध्यायीस्थत्वेन परस्परं सिद्धानि स्युः। ततः भूयान् इति रूपं न सिध्यति। तथा हि - अयमनयोरतिशयेन बहुरिति विग्रहे वैपुल्यवाचकाद् बहुशब्दाद् द्विवचनविभज्योपपदे तरबीयसुनौ ५.३.५७ इति ईयसुन्प्रत्यये आदेः परस्य इति परिभाषया परिष्कृतेन १.१.५४ बहोः परयोः इमेयसोः लोपः स्याद् बहोश्च भूरादेशः इत्यर्थकेन (भाधिकारोक्तेन सिद्धान्तदृष्ट्या आभीयेन) बहोर्लोपो भू च बहोः ६.४.१५८ इति सूत्रेण प्रकृतेः भूभावे प्रत्ययादेः इकारस्य लोपे च कृते भू यस् इति स्थिते भूभावस्य सिद्धत्वात् उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते इत्यर्थकेन (भाधिकारोक्तेन सिद्धान्तदृष्ट्या आभीयेन) ओर्गुणः ६.४.१४६ इति सूत्रेण ऊकारस्य गुणे ओकारे भोयम् इति जाते ततः सौ भोयान् इति स्यात् न तु भूयानिति। सिद्धान्ते ओर्गुणः इति आभीये

कर्तव्ये बहोर्लोपो भू च बहो: इति आभीयस्य असिद्धत्वस्वीकारेण बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वात् गुणस्य अप्राप्तौ भूयानिति रूपसिद्धौ न कापि बाधा। अत एव बहोर्लोप इत्यादिसूत्रव्याख्यायां बालमनोरमायामुच्यते - 'भूभावस्य आभीयत्वेन असिद्धत्वाद् ओर्गुणो न भवति' इति।

प्रसङ्गेऽत्र न्यासकारस्य व्याख्यानं दृशेलिमम्। तेनोक्तं - आ भाद् इति आङ् मर्यादायां वा स्याद्? अभिविधौ वा? तत्र यदि आद्य: (मर्यादा) पक्ष आश्रीयेत, भाधिकारीयस्य असिद्धत्वं न स्यात्। ततश्च असिद्धं बहिरङ्गमन्तरङ्गे इत्यस्या: परिभाषाया: अनाभाच्छास्त्रीयत्वाद् अस्यां प्रवर्तमानायां वसो: संप्रसारणस्य बहिरङ्गस्य, अन्तरङ्गस्य च आकारलोपस्य युगपदुपस्थाने सति तया परिभाषया प्रवर्तमानया वसो: संप्रसारणस्य असिद्धत्वे उत्पादिते अन्तरङ्गत्वाद् आकारलोप: पपुष: इत्यत्र न स्यात्। तेन तदसिद्धरूपं दोषं मर्यादापक्षे दृष्ट्वा अभिविधिपक्ष: समाश्रित: इति।

ग. सूत्रे अत्रेति पदस्य ग्रहणं समानश्रयप्रतिपत्त्यर्थं क्रियते। तद्ग्रहणाभावे पपुष: इत्यादौ दोष: स्यात्। तथा हि पानार्थकाद् भौवादिकात् पाधातो: परोक्षे लिट् ३.२.११५ इति कर्तरि लिटि, लिट: स्थाने क्वसुश्च ३.२.१०७ इति क्वसौ (यद्यपि क्वसुरादेश: छन्दसि भवति तथापि विभाषा पूर्वाह्णापराह्णाभ्याम् ४.३.२४ इति सूत्रे पपुष आगतं पपिवद्रूप्यम् इति भाष्यप्रामाण्यात् क्वसुर्लोकेऽपि क्वचिद् भवति इत्यवगमात्) अनुबन्धलोपे लिटि धातोरनभ्यासस्य ६.१.८ इति धातोर्द्वित्वे अभ्यासह्रस्वे निष्पन्नात् क्वस्वन्तात् प पा वस् इत्येवंरूपात् द्वितीयाबहुवचने शसि (अस्) यचि भम् १.४.१८ इति प्रकृतिभागस्य (प पा वस् इति समुदायस्य) भत्वेन वसो: संप्रसारणम् ६.४.१३१ इति वकारस्य संप्रसारणे उकारे (प पा उ अ स् अस्) संप्रसारणाच्च ६.१.१०८ इति अकारस्य अकारस्य च स्थाने पूर्वरूपे उकारे प पा उ स् अस् इति स्थिते क्वसो: आर्धधातुकत्वेन कित्त्वेन कृते संप्रसारणे अजादित्वेन च, उस् इत्याकारके तस्मिन् परत: अजाद्योरार्धधातुकयो: क्ङिदिटो: परयो: आतो लोप: स्यात् इत्यर्थकेन आतो लोप इटि च ६.४.६४ इति सूत्रेण आकारलोपे, सस्य षत्वे, (प प् १उ ष् अस् > पपुषस् > पपुष:) संयोगे पपुष: इति रूपम्। अत्र आल्लोपे आभीये कर्तव्ये वसो: संप्रसारणम् इति आभीयम् असिद्धं न भवति । यतो हि आल्लोपस्य आश्रय: (निमित्तम्) क्वसु: (उस्) तथा संप्रसारणस्य आश्रय: शस्-रूपा विभक्ति:। अतोऽत्र भिन्नाश्रयत्वं स्पष्टम्।

अत्रेदमाशङ्क्यते - आतो लोप इटि च ६.४.६४ इति सूत्रम् अन्तरङ्गम्। वसो: संप्रसारणम् ६.४.१३१ इति च बहिरङ्गम्। कथमनयो: शास्त्रयो: अन्तरङ्गबहिरङ्गभाव इति चेदत्र न्यासकारेणोच्यते - अत्र (पुरुष:) हि (शस्-अस्) विभक्ते: पूर्वो (प पा उ स्) वस्वन्तो भाग:, तदाश्रय: आकारलोप:, संप्रसारणं तु विभक्त्याश्रयम्। प्रकृत्याश्रयम् अन्तरङ्गम्, प्रत्ययाश्रयं तु बहिरङ्गम् इति । अत: असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया अन्तरङ्गे (आकारलोपे) कर्तव्ये बहिरङ्गम् (सम्प्रसारणम्) असिद्धं भवति इत्यर्थे अवगम्यमाने संप्रसारणस्य असिद्धत्वात् क्वसो: आर्धधातुकत्वेऽपि कित्त्वेऽपि अजादित्वाभावात् आकारलोप: न भवति। अत्र न्यासकृतोच्यते - ननु च उस्यपदान्तात् इत्यनेनैव पररूपेण सर्वं सिद्धम्? नैतदस्ति, प्रतिपदोक्तस्य हि उस्-शब्दस्य तत्र ग्रहणम्, लाक्षणिकश्च अत्र उस्। तत: आकारलोपाभावे पपुष: इति रूपासिद्धिरिति चेत् -

अत्रोच्यते - वाह ऊठ् ६.४.१३२ इति सूत्रम् असिद्धवदत्राभात् ६.४.२२ इत्यस्य अधिकारे पठ्यते। अत एव प्रोक्तं सूत्रम् असिद्धवद् भवति। असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषा वाह ऊठ् ६.४.१३२ इति सूत्रस्थेन ऊठ्ग्रहणेन ज्ञापिता इति कृत्वा आभाच्छास्त्रीया भवति। यत्र अन्तरङ्गबहिरङ्गयोः शास्त्रयोः युगपद् उपस्थानं भवति, तत्र निरुक्ता परिभाषा प्रवर्तते, अन्तरङ्गे कर्तव्ये बहिरङ्गस्य असिद्धतामापादयितुम्। अस्यां स्थितौ परिभाषायां कर्तव्यायां वसोः संप्रसारणम् ६.४.१३१ इति सूत्रस्य आतो लोप इटि च ६.४.६४ इति सूत्रस्य च असिद्धत्वाद् युगपद् उभयोरुपस्थानाभावात् परिभाषाया अप्रवृत्तौ बहिरङ्गसंप्रसारणस्य असिद्धत्वं नास्ति। तेन आकारलोपे सति सिद्धं पपुष इति रूपम्। शब्दरत्नकारेणाप्युक्तमत्र - असिद्धपरिभाषया तु न, तस्य ऊठ् सूत्रे निष्पन्नत्वेन बहिरङ्गान्तरङ्गयोरुभयोरपि (आभीयत्वेन) असिद्धतया तदप्राप्तेः इति।

प्रदीपे प्रसङ्गेऽत्रोच्यते - असिद्धं बहिरङ्गमन्तरङ्ग इति परिभाषया संप्रसारणस्य असिद्धत्वं नास्ति। एषा हि परिभाषा वाह ऊठ् ज्ञापितत्वाद् आभाच्छास्त्रीया। तस्यां प्रवर्तमानायाम् अकारलोपसंप्रसारणयोः असिद्धत्वाद् अन्तरङ्गबहिरङ्गयोः युगपद् अनुपस्थानात्, नाजानन्तर्य इति प्रतिषेधात् वा।

अत्राह उद्योतकारः यद् कैयोटोक्तम् आद्यमेव समाधानं युक्तम्। नाजानन्तर्ये.... इत्यस्याः सिद्धान्त्यसंमतत्वादिति बोध्यम्। अन्यत्रापि उच्यते - वस्तुत इयं (नाजानन्तर्ये... इति परिभाषा) सिद्धान्त्यसंमता इति असकृदावेदितम् ।

तत्त्वबोधिनीकारेण अत्र निगदितम् - न च उक्त (असिद्ध) परिभाषाया आलोपस्य च समानश्रयत्वं नेति शंक्यम्, वसोः संप्रसारणे कृते हि अजाद्याश्रयेण आलोपः प्रवर्तते, तस्मिन् कर्तव्ये संप्रसारणस्य असिद्धत्वाय तद्विषये बहिरङ्गपरिभाषापि प्रवर्तते इति तस्य तत्सत्त्वात् (समानाश्रयत्वस्य सत्त्वात्) इति। अत एव पदमञ्जरीकारो वदति - वसुसंप्रसारणं चैकं परिभाषाया आल्लोपादीनां च आश्रय इति समानाश्रयत्वमप्यस्ति ।

वृत्तौ आभीये कर्तव्ये इति लेखनेन अभाजि इत्यादेः प्रयोगस्य सिद्धिः भवति। तथा हि - आभीये कर्तव्ये आभीयम् असिद्धमिति सिद्धान्तः। अनाभीये कर्तव्ये आभीयम् असिद्धं न भवति। तथा हि आमर्दने वर्तमानाद् रौधादिकात् परस्मैपदिनो भञ्जधातोः कर्मणि लुङि धातोरडागमे लस्य तादेशे च्लि लुङि ३.१.४३ इति धातोः च्लौ, चिण् भावकर्मणोः ३.१.६६ इति च्लेः चिणि अनुबन्धलोपे अभञ्ज् इ त इति स्थिते आभीयेन भञ्जेश्च चिणि ६.४.३३ इति सूत्रेण भञ्जेर्नलोपे अ भज् इ त इति जाते अनाभीयेन अत उपधायाः ७.२.११६ इति सूत्रेण उपधाया अकारस्य वृद्धौ कृतायां चिणो लुक् ६.४.१०४ इति चिणः परस्य तकारस्य लुकि प्रोक्तं रूपम्। अत्र आभीयो नलोपः अनाभीयायाम् उपधावृद्धौ कर्तव्यायां न असिद्धः। तेन उपधायाम् अकारदर्शनाद् वृद्धिः निर्बाधा।

### १२. टीकाकृद्वैमत्योद्घाटनम्

प्रक्रियाकौमुदीकारेण कार्यासिद्धत्वपक्षः समुपस्थापितः। तदुक्तं तेन प्रकृतसूत्रवृत्तौ-अत ऊर्ध्वमापादसमाप्तेः कार्यम् आभाच्छास्त्रीयम्, तस्मिन् कर्तव्ये तत्रत्यं कार्यमसिद्धवत् स्यादिति ।

तट्टीकाकृता श्रीकृष्णपण्डितेन तु कार्यमिति प्रतीकमादाय क्रियतेऽनेनेति कार्यं शास्त्रमिह विवक्षितम्।

तेन शास्त्रे शास्त्रमसिद्धं भवति इत्युक्त्वा शास्त्रासिद्धत्वपक्षः समर्थितः।

प्रौढमनोरमाकारेण शास्त्रासिद्धत्वपक्षः समर्थितः। तदुक्तं तेन - अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितम् इति।

तत्त्वबोधिनीकारः शास्त्रासिद्धत्वपक्षस्य समर्थकः। तदुक्तं तेन प्रकृतसूत्रव्याख्यायाम् - अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितम् इति।

बालमनोरमाकारः अस्य सूत्रस्य व्याख्याने कार्यासिद्धत्वपक्षमेव प्रतिपादयति। प्रकृतसूत्रटीकायां तेनोक्तम् - विहितं कार्यमिति शेषः। ततश्च श्नान्नलोपः इत्यारभ्य आपादपरिसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद् भवति। तथश च यद्यत्सूत्रे इदमनुवर्तते तत्तदाभीये कार्ये कर्तव्ये इति लभ्यते। एवं च श्नान्नलोपः इत्यादि तत्तदाभीयं कार्यं श्नान्नलोपः इत्याद्याभीये कार्ये कर्तव्ये असिद्धवद् इत्यर्थः पर्यवस्यति । एतत् सर्वं भाष्ये स्थितम् इति।

कार्यासिद्धत्वपक्षे युक्तिः - शास्त्रकार्ययोर्मध्ये शास्त्रं कार्यार्थं समाश्रीयते। अतः शास्त्रापेक्षया कार्यस्य प्राधान्यम्। शास्त्रं हि कार्यार्थत्वाद् अप्रधानम्।

शास्त्रासिद्धत्वपक्षे युक्तिः - यतो हि कार्यं शास्त्रनिमित्तकं तस्मात् शास्त्रस्य प्राधान्यम्। किञ्च शास्त्रस्य असिद्धत्वे कार्यस्य असिद्धत्वं स्वतः लभ्यते। आ भात् इति शास्त्रस्य अवधित्वेन उपादानाच्च शास्त्रस्य असिद्धवद्भावः युक्तः, अन्यथा हि सूत्रकारः कार्यमेव किञ्चिद् अवधित्वेन उपादीयेत। अतो व्यापकत्वात् शास्त्रस्य एव असिद्धत्वम्, आ भात् इति शास्त्रस्यैव विषयत्वेन निर्देशाच्च।

ननु कार्यासिद्धत्वपक्षे कथङ्कारं दोष इति चेदुच्यते - देवदत्तहन्तृहतन्यायेन इति अवगम्यताम्। हते देवदत्ते तद्धन्तरि हतेऽपि नोन्मज्जनं, हतत्वारोपे तु सुतराम् (नोन्मज्जनं देवदत्तस्य)। हन्तुमुद्यतस्य हनने तूज्जीवनमस्त्येव इति देवदत्तहन्तृहतन्यायशरीरम्। तेन देवदत्तस्य हन्तरि हतेऽपि देवदत्तस्य यथा न दर्शनम्, तथात्र (एधीत्यत्र) देवदत्तस्थानीयायाः झल्बुद्धेः हननसदृशादेशसंपादकं घ्वसोरेद्धावभ्यासलोपश्च ६.४.११९ इति शास्त्रम् । तस्य प्रवृत्तिरेव हननम्। तस्मिन् कृते झलः अदर्शनमस्तीति हुझल्भ्यो हेर्धिः इति न स्यात्।

न च तौ सत् ३.२.२७ इति निर्देशेन न्यायोऽयमनित्य इति वक्तुं युक्तम्। तथा हि - (तद् औ > त अ औ > त औ इत्यवस्थायम्) देवदत्ततुल्यवृद्धेः हन्तृतुल्यबाधकपूर्वसवर्णदीर्घस्य हन्तृतुल्येन नादिचि ६.१.१०४ इत्यनेन निषेधेपि देवदत्तस्य वृद्धेः उन्मज्जनाभावात् तौ इति निर्देशः अनुपपन्नः सन् तन्न्यायस्य अनित्यत्वे ज्ञापकः। अतो देवदत्तहन्तृहतन्यायस्यात्र अप्रवर्तनमिति चेत् तदोच्यते रत्नकृता - तौ इत्यादौ वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य हननोद्यमसजातीयं प्रसङ्गमात्रम्, न तु हननस्थानीया लक्ष्ये प्रवृत्तिः इति न तत्र (तौ इत्यत्र) अस्य न्यायस्य विषय इति तेन (तौ सदिति निर्देशेन) नास्य अनित्यत्वं बोध्यते।

**१३. प्रकीर्णकम्**

क. यदिदं विधिसूत्रं स्यात् तर्हि आ भात् इति पदस्य ग्रहणम् असिद्धवद्भवतः निर्देशार्थं भवेद्, यं प्रति असिद्धत्वं तन्निर्देशार्थं वा भवेत् विनिगमनाया विरहात् । तेन आभीयम् आभीये असिद्धम् इत्येवार्थः

स्यात्। सूत्रे निमित्तस्य अनुल्लेखात् समानाश्रयत्वरूपार्थो न लभ्येत तथा तदर्थं क्रियमाणम् अत्रग्रहणमपि अनर्थकं भवेत्। अत एव निर्दुष्टसूत्रार्थसम्पत्तये सूत्रस्य अधिकारत्वं स्वीकार्यम्।

ख. ननु प्रकृतसूत्रस्य अधिकारत्वे यस्मिन् यस्मिन् सूत्रे असिद्धवदिति सूत्रस्य उपस्थानं भवति तस्मात् सूत्रादेव आरभ्य यद् आभीयं तस्मिन्नेव कर्तव्ये असिद्धत्वं स्यात्, न तु ततः पूर्वस्मिन्नपि कर्तव्ये। यद्देशस्थेन हि वक्त्रा आट् (आडुत्तमस्य पिच्च ३.४.९२) उच्चार्यते तत एव आरभ्य मर्यादाभिविधिप्रतिपत्तर्भवति। यथा आ पाटलिपुत्राद् वृष्टो देव इत्युच्यमाने पाटलिपुत्राद् एव मर्यादा अभिविधिश्च बोध्यते। ततश्च घ्वसोरेद्धावभ्यासलोपश्च ६.४.११९ इति विधीयमानमेत्त्वं पूर्वस्मिन् हुझल्भ्यो हेर्धिः ६.४.१०१ इति धित्वे कर्तव्ये नासिद्धं (सिद्धम्) स्यात् । तेन झलन्तत्वाभावात् हेर्धित्वाभावेन एधि इति रूपं न सिध्यति इति चेद् -

अत्रोच्यते - अधिकारविषये शब्दाधिकारः अर्थाधिकारः चेति द्वौ पक्षौ । शब्दाधिकारे अर्थरहितं शब्दमात्रमनुवर्तते। अर्थाधिकारे यादृशार्थकं पूर्वत्र तादृशार्थकमेव पदं परत्र अनुवृत्तिस्थलेऽपि। अत्र सूत्रे सतोरपि उभयोः पक्षयोः शब्दाधिकारे दोषसद्भावाद् अर्थाधिकारपक्षः स्वीक्रियते। किञ्च अर्थाधिकारपक्षे लाघवमस्ति। तदुक्तं शब्दरत्नकारेणशब्दाधिकारे शब्दार्थयोरुभयोः कल्पना, अर्थाधकारे तु शब्दमात्रस्येति लाघवादिति भाव इति। एवमर्थाधिकारे अनेन सूत्रेण अयमर्थः सम्पादितः यत् श्नान्नलोपः इत्यारभ्य आ पादपरिसमाप्तेः यानि सूत्राणि तानि अन्योऽन्यस्मिन् असिद्धवद् भवन्ति, तानि चेत् तुल्यनिमित्तानि इति। ततश्च घ्वसोरेद्धावभ्यासलोपश्च ६.४.११९ इति विधीयमानमेत्त्वं पूर्वस्मिन् हुझल्भ्यो हेर्धिः ६.४.१०१ इति धित्वे कर्तव्ये असिद्धं भवति। तेन झलन्तलक्षणं धित्वं निर्बाधम्। एतत्सर्वं पदमञ्जर्यां प्रक्रियाकौमुद्याः प्रकाशटीकायां प्रौढमनोरमायां तत्त्वबोधिन्याञ्च आलोचितमस्ति।

ग. नागेशाशयः - लघुशब्देन्दुशेखरे नागेशभट्टेन अधिसूत्रविषयं गदितम् - इदं सूत्रमनित्यम्। श्नसोरल्लोपः ६.४.१११ इति सूत्रस्थतपरकरणात्। तथा हि अस् ताम् इति स्थिते जनसनखनां सञ्झलोः ६.४.४२ इति सूत्रभाष्योक्तरीत्या आभीयेषु विप्रतिषेधसत्तवेन, परत्वात् लोपे, तस्य आभीयत्वेन आसिद्धत्वात्, पुनः प्रसङ्गविज्ञानेन आटि, लक्ष्यभेदात् लक्ष्ये लक्षणस्येति न्यायाऽप्राप्तौ, प्राप्तस्य आटो लोपस्य वारणार्थं तत्र तपरकरणम्। तच्च आटोऽसिद्धत्वे व्यर्थं सत् तदनित्यत्वज्ञापकम् इति ।

अयं भावः - श्नसोरल्लोपः ६.४.१११ इति सूत्रं (श्नेति श्नम्प्रत्ययैकदेशनिर्देशः) सार्वधातुके क्ङिति परतः श्नस्य अस्तेश्च आकरस्य लोपं विधत्ते। तत्र अत् इति तपरकरणं कृतम्। अस्-धातोः लङि प्रथमद्विवचनविवक्षायां तसि तसः तामादेशे अस् ताम् इति स्थिते आडजादीनाम् ६.४.७२ इति अजादेरङ्गस्य अस्तेः आडागमस्य, तामः सार्वधातुकत्वात् स्वयमपित्त्वेन सार्वधातुकमपित् १.२.४ इति ङित्त्वाच्च श्नसोरल्लोपः ६.४.१११ इति सूत्रेण विहितस्य अल्लोपस्य च युगपत् प्रवृत्तौ उभयोः सत्यपि आभीयत्वे आभीयेषु विप्रतिषेधसत्त्वेन परत्वात् अकारलोपे स् ताम् इति जाते तस्य अल्लोपस्य आभीयत्वेन असिद्धत्वात्, पुनः प्रसङ्गविज्ञानेन आटि कृते आस् ताम् इति जाते पुनः तेनैव (६.४.१११) सूत्रेण आटः आकारस्य लोपे प्रसक्ते (अकारस्य एव लोपः स्यात् न आकारस्य इति विवक्षया) तद्वारणाय अत् इति तपरकरणं क्रियते। न

च तत्र लक्ष्ये लक्षणं सकृदेव प्रवर्तते इति परिभाषया पुनः अल्लोपो न भविष्यति इति शंकनीयम्, लक्ष्यभेदे परिभाषा न प्रवर्तते इति अङ्गीकारात्। न च अत्र लक्ष्यभेदो नास्ति इति वाच्यम्, पूर्वम् अस्तेः अकारस्य लोपो जातः संप्रति तु आकारस्य लोपप्राप्तिः इति लक्ष्यभेदस्य स्पष्टत्वात् । अस्यामवस्थायाम् आस् ताम् इति लक्ष्यस्य भेदात् आटः आभीयत्वेन असिद्धत्वात् तपरकरणं व्यर्थं भवत् असिद्धवदिति सूत्रस्य अनित्यत्वं ज्ञापयति। ततश्च श्नसोरलोपः इति सूत्रस्वरूपे स्वीक्रियमाणे आस् ताम् इत्यत्र असिद्धवदिति सूत्रस्य अनित्यत्वेन प्रवृत्त्यभावपक्षे अकारेण ग्रहणकशास्त्रबलात् आकारस्यापि बोधात् तस्य लोपे प्रसक्ते ह्रस्वस्य अकारस्य लोपो यथा स्यात् न दीर्घस्य इति एतदर्थं तपरकरणं स्वांशे चरितार्थं भवति।

नेदं नागेशस्य स्वकीय आशयः। न्यासे पदमञ्जर्यां च उपर्युक्तं वचनमुपलभ्यते। श्नसोरल्लोपः ६.४.१११ इति सूत्रे न्यासकारो वदति - अथ तपरकरणं किमर्थम् आस्ताम् आसन् इत्यत्र आडागमस्य मा भूत् इति चेत् ? नैतदस्ति; इह हि लङि कृते लावस्थायाम् आडागमात् पूर्वमन्तरङ्गत्वात् लादेशः क्रियते। तत्र (लादेशे) कृते विकरणः कृताकृतप्रसङ्गित्वात् आडागमं बाधते। आडागमस्य तु अशब्दान्तरप्राप्तेः अनित्यत्वम्। तथा हि - कृते विकरणे विकरणान्तस्य अङ्गस्य तेन (आडागमेन) भवितव्यम्, अकृते धातुमात्रस्य (आडागमेन भवितव्यम् इति शेषः)। कृते विकरणे यद्यपि आडागमाऽकारलोपयोः द्वयोरपि कृताकृतप्रसङ्गित्वेन नित्यत्वम्, तथऽपि परत्वाद् आकारलोपः क्रियते, तस्मिन् (अकारलोपे) कृते तस्य (अकारलोपस्य) असिद्धत्वाद् आट्, तस्य (आटः) असिद्धत्वादेव च (अकारस्य) लोपो न भविष्यतीति किं (अत् इत्यत्र) तपरकरणेन ? एवं तर्हि एतज् ज्ञापयति-आभाच्छास्त्रीयमसिद्धत्वमनित्यमिति। तेन वुग्युटावुवङ्यणोः सिद्धौ भवतः इत्येतद् वक्तव्यं न वक्तव्यं भवति।

प्रदीपे विद्यते - श्नसोरल्लोपः इति तपरकरणाच्च लिङ्गात् क्वचित् सिद्धत्वं शक्यमनुमातुम्। अन्यथा- आस्ताम्-आसन् इत्यादौ आटः असिद्धत्वात् लोपाप्रसङ्गात् किं तपरकरणेन ?

तत्र उद्योते उद्यते - अस् ताम् इति स्थिते विप्रतिषेधे आभीयासिद्धत्वाभावस्य वक्ष्यमाणतया आडपेक्षया परत्वाद् अल्लोपे तस्य असिद्धत्वात् पुनः प्रसङ्गविज्ञानेनाटि विकारान्यानुपूर्व्या ऐक्याभावात् लक्ष्ये लक्षणस्य इति न्यायाप्राप्त्या प्राप्ताटो लोपस्य वारणाय कृतं तपरत्वम् आटोऽसिद्धत्वे व्यर्थं सत् तदनित्यतां ज्ञापयति ।

अत एकहल्मध्ये...... इति सूत्रे न्यासे एवं लिखितम् - श्नसोरल्लोपः इत्यत्र आभाच्छास्त्रीयस्य असिद्धत्वस्य अनित्यत्वं ज्ञापितम्, तेन दम्भेरेत्त्वे कर्तव्ये लोपस्य असिद्धत्वं न भवति, ततश्च दम्भेर्लिटि एत्त्वं भविष्यति।

पदमञ्जरीकारो वदति - तपरकरणं किम्? आटो मा भूत् - आस्ताम्, आसन्, असिद्ध आट्। एवं तर्हि आभीयस्य असिद्धत्वमनित्यत्वमिति ज्ञापनार्थं तपरकरणम् इति। अन्यत्राप्युक्तं तेन - श्नसोरल्लोपः इति तपरकरणाल्लिङ्गात् क्वचित् सिद्धत्वमनुमीयते, तद्धि आस्तामित्यादौ आटो मा भूदिति। यदि चेदमसिद्धत्वं नित्यं स्यात्ए आटोऽसिद्धत्वादेव लोपो न भविष्यति इति किं तपरकरणेन?

तत्त्वबोधिनीकारेण प्रकृतसूत्रव्याख्यायामुच्यते - श्नसोरल्लोपः ६.४.१११ इति तपरकरणाल्लिङ्गाद्

आभीयासिद्धत्वमनित्यमिति। तपरकरणं हि आस्ताम् इत्यत्र आडागमस्य लोपो मा भूत् इत्येतदर्थम्। यदि आडागम: श्नसोरल्लोपं प्रति आभीयत्वेन असिद्ध: स्यात् तर्हि किं तेन तपरकरणेन इति।

सूत्रनित्यत्वविषये अत एकहल्सूत्रे दम्भ एत्वमलक्षणम् (श्लोकवा.)। असिद्धत्वान्नलोपस्य दम्भ एत्वं न सिध्यति।.......श्नसोरत्त्वे तकारेण ज्ञायते त्वेत्त्वशासनम्। इति श्लोकवार्तिकस्य व्याख्यायामुच्यते भाष्ये - अनित्योऽयं विधिरिति। अत्र प्रदीपकृदाह - असिद्धत्वस्य अनित्यत्वज्ञापनाय तकार: कृत:। नित्ये हि असिद्धत्वे आसन् इत्यादौ आट: असिद्धत्वाद् लोपो न भविष्यतीति किं तन्निवृत्त्यर्थेन तकारेण। तेन असिद्धत्वाभावाद् दम्भ एत्वं सिध्यति।

आभीयासिद्धत्वस्य अनित्यत्वे फलम् - देभतु: इत्यादे: सिद्धि:। तथा हि दम्भने (लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भ:) वर्तमानात् स्वादिगणीयात् दम्भुधातो: लिटि तसि तसोऽतुसि दम्भ् अतुस् इति स्थिते श्रन्थि-ग्रन्थि-दम्भि-स्वञ्जीनां लिट: कित्त्वं वा इति व्याकरणान्तरनियमेन लिट: कित्त्वेन अनिदितां हल उपधाया: क्ङिति ६.४.२४ इति झलन्तस्य अनिदित: अङ्गस्य उपधाया नकारस्य कित्परस्य लोपे धातोर्द्वित्वे अभ्यासत्वे दभ् दभ् अतुस् इति जाते अत एकहल्मध्येऽनादेशादेर्लिटि ६.४.१२० इति आभीये कर्तव्ये अनिदितां हल उपधाया: क्ङिति ६.४.२४ इति आभीयमसिद्धं स्यात्तदा नलोपस्य असिद्धत्वेन एत्त्वाभ्यासलोपयोरप्राप्तौ प्रोक्तं रूपं न सिध्यति। परन्तु असिद्धवदिति सूत्रस्य अनित्यत्वेन अत्र अप्रवृत्तौ नलोपस्य सिद्धत्वाद् एत्त्वाभ्यासलोपौ स्त इति। तेन दम्भेश्च एत्त्वाभ्यासलोपौ वक्तव्यौ इति वार्तिकं न अपूर्ववचनं किं तु प्रकृतसूत्रानित्यत्वबललभ्यमेव।

**१४. भाष्यकारमतम्** - भाष्ये सूत्रारम्भसमर्थकानि कात्यायनोक्तानि सर्वाणि वार्तिकानि प्रकारान्तरेण उपपत्तिं प्रदर्शयता प्रत्याख्याय श्लोकवार्तिककारोक्तप्रयोजनान्यपि निराकृतानि भगवता भाष्यकृता। श्लोकवार्तिकोपन्यासप्रसङ्गे अगादि कैयटेन - वार्तिककारोक्तेषु प्रयोजनेषु प्रत्याख्यातेषु श्लोकवार्तिककारोक्तप्रयोजनोपक्षेप:। तत्र (उद्योते) वार्तिककार: - कात्यायन:। श्लोकवार्तिककारस्तु अन्य एवेत्यवादीदुद्योतकार:। अत एव भाष्ये तु एतत्सूत्रं प्रत्याख्यातमित्याह प्रकाशकृत्। सूत्रं तु प्रत्याख्यातमाकरे इति प्रौढमनोरमाकार:।

परन्तु आरभ्यमाणेऽप्येतस्मिन्योगे इति भाष्यांशं व्याचिख्यासुना अनेकपरिहाराश्रयेण प्रतिपत्तिगौरवं मा भूत् इत्येवमर्थमारभ्यमाणे इति ब्रुवता कैयटेन प्रतिपत्तिगौरवपरिहाराय सूत्रमिदमावश्यकमित्यवाचि।

पदमञ्जरीकारोपि तदेवं न सन्ति प्रयोजनानि, प्रतिपत्तिगौरवपरिहारार्थं सूत्रमारब्धमित्याह।

बृहच्छब्देन्दुशेखरे नागेशस्तु इदं सूत्रं स्पष्टार्थकम्। ध्वनितं चेदम् आरभ्यमाणेऽप्येतस्मिन्नि-त्यादिना भाष्येण इति वदति।

**१५. स्वमतम्** - व्याकरणस्य प्रक्रियांश: अविद्याविजृम्भित एव। तदुक्तं भर्तृहरिणा शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते इति। अखिल: खलु लोकव्यवहार: वाक्यमालम्ब्य प्रवर्ततेतमाम्। क्वचित् निशम्यामि पदं स प्रवर्तते। शिष्टप्रयुक्तपदानामन्वाख्यानाय प्रवर्तत इदं खलु पदशास्त्रम्। तदन्वाख्यानाय बहुविधं मार्गं श्रयते व्याकरणमिदम्। तेष्वसिद्धमार्गा-श्रयणमेकम्। सिद्धे असिद्धत्वमारोप्य प्रवर्तमानमिदं व्याकरणं यदि

सत्यस्य पदस्य साधुत्वं निर्वक्ति तर्हि का हानिरत्र आपद्येत। तदुक्तम् - उपाया: शिक्षमाणानां बालानामुपलालना:। असत्ये वर्त्मनि स्थित्वा तत: सत्यं समीहते इति ।। आरोपितस्य ज्ञानस्य अप्रमात्वेन तादृशं ज्ञानं पुरस्कृत्य शास्त्रप्रवृत्ति: किमु साध्वी इति चेदत्रोच्यते नागेशेन-यद्यपि लोके अनाहार्यज्ञानस्य (यथार्थज्ञानस्य) प्रवर्तकत्वं निवर्तकत्वं च दृष्टं तथापि इह (व्याकरणे) शास्त्रप्रामाण्यात् आहार्यारोपोऽपि शास्त्रप्रवृत्तौ अप्रवृत्तौ च नियामक इति बोध्यम् इति शिवम् ।

*सहकारी अध्यापक:*
*रामकृष्णमिशन्-विद्यामन्दिरम् इत्याख्यस्य*
*स्वयंशासितमहाविद्यालयस्य संस्कृतविभाग:*

# कृत्यधिकारसूत्रस्वरूपम्

*डॉ. शङ्कर्षण पण्डा*

भगवत: पाणिने: षड्विधेषु सूत्रेषु अधिकारसूत्रं विधिशास्त्रस्योपकारकत्वेनोपदिष्टम्। सूत्रात्मकं पाणिनीयं व्याकरणम्। यथा सूत्रात्मकशैल्या शब्दसाधुत्वं सुकरं भवति। ''कृत्या:'' (पा.सू. ३.१.९५) इति षड्विधेषु सूत्रेषु अधिकारसूत्रम्। अष्टाध्याय्या: तृतीयाध्यायस्य प्रथमपादस्य पञ्चनवतिसूत्रमिदम्। अस्मिन् अधिकारे सप्तत्रिंशत्सूत्राणि सन्निवेशितानि सन्ति। ''ण्वुल्तृचौ'' (पा.सू., ३.१.१३३) इत्यत: प्राक् ''चित्याग्निचित्ये च'' (पा.सू., ३.१.१३२) इति सूत्रं यावत् अस्याधिकार:। ''कृत्या:'' इति बहुवचनेन निर्देशो बहुत्वात् संज्ञिनाम्। अथवा अनुक्तकृत्प्रत्ययसंग्रहार्थं बहुवचनम्। तेन ''केलिमर उपसंख्यानम्'' (वा.) इत्येतत् कर्त्तव्यं न भवतीति न्यासकारस्य मतमिदम्। ''ण्वुल्पृचौ'' इत्यत: प्रागित्यर्थ: एतच्च भाष्ये स्पष्टम्।

धातोर्द्विविधा: प्रत्यया विधीयन्ते। तिङ्प्रत्यया: कृत्प्रत्ययाश्च। तिङ्प्रत्ययानां संख्या अष्टादश। यथा - तिप्तस्झि प्रभृतय:। कृत्प्रत्ययानां संख्या बहुषा भवन्ति। करोति - क्रियायां फलमुत्पादयति इति कृत् कारकरूपं क्रियारूपञ्च। कृत्प्रत्ययेन निष्पन्नं पदं कृदन्तमित्युच्यते। क्रिया द्विविधा। साध्यभूता सिद्धभूता च। कृदन्तक्रिया सिद्धक्रिया इति। ''कृदभिहितो भावो द्रव्यवत् प्रकाशते'' इति। तत्र कृदन्तस्य ''कृत्तद्धितसमासाश्च'' (पा.सू. १.२.४६) इत्यनेन प्रातिपदिकसंज्ञायां सुबुत्पत्तिर्भवति। कृद्विषये पाणिने: सूत्रमेवम् - ''कृदतिङ्'' इति (पा.सू., ३.१.९३)। ''धातो:'' (पा.सू. ३.१.९१) इत्यस्याधिकारेऽष्टाध्यार्या: तृतीयाध्यायस्या: प्रत्यया: कृदन्त इति निरूपिता:। कृत्प्रत्यया धातोरेव विधीयन्ते। अत्र पाणिनीयव्याकरणे सन्निहिते धात्वाधिकारे तिङ्भिन्नानां प्रत्ययानां ''कृदतिङ्'' (पा.सू., ३.१.९३) इति सूत्रेण कृत्संज्ञा भवति। ''कर्त्तरि कृत्'' (पा.सू., ३.४.९५) इति साभाव्यं सूत्रमिदम्। कर्त्तरि अर्थे कृत्प्रत्ययो भवति इति सामान्यम्। कृत्प्रकरणे केचन कृत्यप्रत्यया: सन्ति। तेषां संख्या सप्त विद्यन्ते। यथा - तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् च। एते प्रत्यया: ''कृत्या:'' (पा.सू. ३.१.९५) इति सूत्रस्याधिकारे पठितत्वात् कृत्यसंज्ञका भवन्ति। ''कृत्या'' (पा.सू. ३.१.९५) इति सूत्रत: ''चित्याग्निचित्ये च'' (पा.सू., ३.१.१३२) इति सूत्रं यावत् विधीयमाना: प्रत्यया: कृत्या इति कथ्यन्ते। ''ण्वुल्तृचौ'' (पा.सू., ३.१.१३३) इति सूत्रं कृत्प्रत्ययविधायकम्। प्रक्रियाग्रन्थेषु सर्वत्र पूर्वं कृत्यप्रत्ययान्ता: शब्दा निरूपिता:। ल: कर्मणि च भावे चाकर्मकेभ्य: (पा.सू., ३.४.६९) इत्यनुवर्त्तमाने तयोरेव कृत्यक्तखलर्था: (पा.सू. २.४.७०) इति सूत्रेण तयो: - भावकर्मणोरेव कृत्य-क्त-खलर्थप्रत्यया विधीयन्ते। सूत्रेऽस्मिन् ''एवं इति वचनेन स्पष्टं प्रतीयते यत् कर्त्तरि अर्थे कृत्यानां प्रयोगो न भवति। अतोऽकर्मकधातुभ्यो भावमात्रे सकर्मकेभ्य उभयत्र भवन्ति।'' उक्तञ्च -

तव्यानीयौ ण्यद्यत्क्यप् पञ्चैते कृत्यसंज्ञका:।
भावेकर्मणि चैतेस्युर्लक्ष्यतेऽन्यत्र कुत्रचित्॥

''केलिमर्'' प्रत्ययोऽपि कृत्यप्रत्ययान्तर्गत इति भाष्यसम्मत:। अतएव परिगणनया कृत्यप्रत्यया: षड्विधा: सप्तविधा वा इति । तदुक्तम् -

कृत्या: पञ्च समाख्याता भावे कर्मणि यण्ण्यतौ ।
तण्यानीयौ च क्यप् षष्ठ: केलिम: कर्मकर्त्तरि ।।

अपि च - तव्यञ्च तव्यतीयञ्चानीयरं केलिमरं तथा ।
यतं ण्यतं क्यपं चैव सप्तकृत्यान् प्रचक्षते ।।

''कृत्यानां कर्त्तर वा'' (पा.सू., २.३.७१) इति सूत्रानुसारेण कृत्ययोगे कर्त्तरि षष्ठी वा स्यात्। ''कर्त्तुकर्मणो: कृति:'' इत्यनेन सूत्रेण कृद्योगे कर्तरि कर्मणि च नित्यं षष्ठी स्यात्, परन्तुं इदं वैकल्पिकं सूत्रम्। कृत्योगे अनभिहिते कर्त्तरि षष्ठी वा स्यात्। पक्षे तृतीया। यथा मया-मम वा सेव्यो हरि:। अत्र 'सेव्' धातो: कर्मणि ''ऋहलोर्ण्यत्'' इत्यनेन सूत्रेण ण्यत्प्रत्यये कृते 'सेव्य:' इति पदं सिद्ध्यति। 'सेव्य:' इति पदयोगे कर्त्तरि षष्ठी पक्षे तृतीया ।

सूत्रे ''कर्त्तरि'' इति किम् इति प्रश्ने ''भव्यगेयप्रवर्चनीयोपस्थानीयजन्याप्लाव्यापात्या वा'' (पा.सू., ३.४.६८) इत्यनेन सूत्रेण कर्त्तरि यत् प्रत्ययो भवति। ''गेयो माणवक साम्नाम्'' अत्र अनेन सूत्रेण 'गेय:' इत्यत्र कर्त्तरि यत्। सूत्रे कर्त्तरि यत्विधानेन कर्म अनभिहितं भवति। तथा च कर्मवाचकसामन्शब्दात् सूत्रे कर्त्तृग्रहणाभावे विकल्पेन षष्ठी प्राप्नाति एतदर्थं सूत्रे कर्त्तरि इति ग्रहणम्। अनुक्ते कर्मणि ''कर्त्तृकर्मणो कृति:'' अनेन नित्यं षष्ठी। ''गेय:'' इत्यत्र कर्त्तु: उक्तत्वात् प्रथमैव।

कृत्ययोगे कर्त्तृकर्मणो: उभयो: अनुक्ते किं करणीयम् इति आशङ्कायां भाष्यकारेण अत्र योगो विभज्यते। ''एवं तर्हि योगविभाग: करिष्यते । कृत्यानाम्। कृत्यानां प्रयोगे षष्ठी न भवतीति''। ''कृत्यानाम्'' इत्येको योग:। तत: ''कर्त्तरि वा'' इत्यपरो योग:। तत्र ''कृत्यानाम्'' इत्यत्र ''उभयप्राप्ता कर्मणि'' इत्यत: ''उभयप्राप्तौ'' ''न लोकाव्यनिष्ठा -'' (पा.सू. २.३.६९) इत्यत: ''न'' चानु वर्त्तते। अत: सूत्रार्थो भवति - कृत्ययोगे कर्तृकर्मणो: उभयो: अनुक्तेऽपि षष्ठी न स्यात्। यथा - नेतव्या व्रजं गाव: कृष्णेन अत्र कृत्यसंज्ञकतव्य-प्रत्यययोगात् ''उभयप्राप्तौ कर्मणि'' इति वाधित्वा ''कृष्णात्'' षष्ठी विकल्प: स्यात्। ''व्रजात्'' इत्यत्र ''कर्त्तृकर्मणो: कृति'' इति नित्यं षष्ठी स्यात् । अत: भाष्यकारकृतं योगविभागमाश्रित्य अत्र षष्ठी न भवति। काशिकाकारेण योगविभाग: न स्वीकृत:। ''उभयप्राप्तौ कृत्ये षष्ठया: प्रतिषेधो वक्तव्य:'' इति पठित्वा समाहितम्। ''कर्त्तरि वा'' इत्यपरो योग:। अत्र ''कृत्यानाम्'' इत्यस्यानुवर्त्तते। सूत्रार्थो भवति - कृत्योगे कर्त्तरि षष्ठी वा स्यात् । यथा मया मम वा सेव्यो इति।

कृत्यप्रत्यायानां लिङ्गत्रये प्रयोगो दृश्यते। यदा भाववाच्ये प्रयोग: स्यात् तदा ''भावो औत्सर्गिकम् एकवचनं क्लीवत्वं च ।'' औचित्य: भविष्यदर्थे च कृत्यप्रत्ययानां प्रयोगो भवति। किन्तु ''भावविहितप्रत्यया द्रव्यवत् प्रकाशन्ते'' यथा एतत् ते शयनीयम्। अत्र शयनीयम् - शय्या इत्यर्थ: अधुना समासत: कृत्यप्रत्यया:

आलोच्यन्ते -

१. तव्य - तव्यत् अनयोर्नकोऽपि भेद:। तित्त्वात् केवलं स्वरभेद:। ''तित् स्वरितम्'' इ.सू. स्वरितत्वविधानार्थं तित्करणम्। ''तव्यत्तव्यानीयर:'' इत्यनेन सूत्रेण भावकर्मणो: धातोरेते प्रत्यया: स्यु:।

२. अनीयर् - ''अनीयर्'' इत्यस्य ''र्'' स्वरार्थम् । ''उपोत्तमं रिति'' इ.सू. मध्योदात्तार्थं रेफानुबन्ध:।

३. यत् - स्वरवर्णान्त अदुपध-पवर्गान्तधातुभ्यो यत् प्रत्यय: स्यात्। तथैव शक्-सह्-गद-मद-चर-यम-वहधातूमामपि यत्।

४. क्यप् - इण्-स्तु-शास्-वृ-दृ-जुष्-मृज्-भृञ्-हन्-खन्-वद्-भू-इत्यादि धातुभ्य: क्यप् भवति।

५. ण्यत् - ऋवर्णान्त-व्यञ्जनान्त-उकारान्तधातुभ्य: ण्यत्।

६. केलिमर् - ''केलिमर उपसंख्यानम्'' इति वर्त्तिकेन केलिमर् प्रत्ययो भवति। पचेलिमा माषा: इत्युदाहरणम्
।

कृत्यप्रत्यया यद्यपि भावकर्मणोरेव प्रयुज्यन्ते तथापि कदाचित् एते कर्त्तरि अर्थेऽपि प्रयुक्ता भवन्ति।

१. वसेस्तव्यत् कर्त्तरि णिच्च इति वार्तिकेन वस्धातो: कर्त्तरि 'तव्यत्' प्रत्यये कृते वसतीति - वास्तव्य: इति सिद्ध्यति।

२. भव्यगेयप्रवचनीय - इत्यनेन सूत्रेण कर्त्तरि अर्थे यत्प्रत्ययो भवति । भवतीति -भव्य:। कर्तृभिन्नकारकार्थेऽपि कृत्यप्रत्यया भवन्ति ।

''कृत्यल्युटो बहुलम्'' इत्यनेन सूत्रेण बहुलग्रहणात् अनीयर् प्रत्यय: करणे सम्प्रदानार्थेऽपि भवति । यथा - करणे-स्नाति-अनेन - स्नानीयम् सम्प्रदाने - दीयतेऽस्मै - दानीय:।

) ''वह्यं करणम्'' इ.सू., वह्धातो: करणे अर्थे यत् भवति। वहन्ति अनेन वह्यम्।

) राजसूयसूर्य - इ.सूत्रेण राजसूय: अत्र अधिकरणे क्यप् निपातनम्।

सूर्य: - सरति आकाशे सूर्य:। अत्र सृधातो: कर्त्तरि क्यप्।

) ''पुंष्यसिध्यौ नक्षत्रे'' अधिकरणे क्यब् निपात्यते। पुष्यन्त्यस्मिन्नर्था: पुष्य:।

) अमावस्यदन्यतरस्याम् इत्यनेन अमोपपदाद् वसरेधिकरणे ण्यत्। अमा - सह वसतोऽस्यां चन्द्रार्कावमावास्या अमावस्या।

) मीयते अनेन इति पाय्यम्। मान अर्थे धातो: करणार्थे ण्यत् । पाय्यसान्नाय्य - इति सूत्रेण।

) निकाय्य: - निवास:। इति अर्थे अधिकरण अर्थे ण्यत् भवति ।

परिशेषे कृत्यप्रत्ययान् पर्यालोच्य कानिचित् इहस्यानि स्पष्टार्थं प्रयासो विहित:। कृत्यप्रत्ययानां भेदप्रदर्शनपुर: सरं तेषामुपादेयता, सूत्रादाहरणादिविविधविषयाणां विवेचनं अत्रोपस्थापित:।

*कालिआ-चक-आदर्शसंस्कृतमहाविद्यालय:*
*पश्चिमवङ्ग: ।*

# अधिकारस्वरूपमीमांसा

*डॉ. प्रियव्रतमिश्रः*

**वाङ्मुखम् -**

अयि शास्त्रैकमतयो यतयो विद्वांसः पीतपातञ्जलजलाः शब्दशास्त्रैकचक्षुष्का विदन्त्येव तत्र लोकोपकारेच्छया जगदुद्धीर्षुणा भगवता पाणिनिना अष्टकं सूत्रं प्राणायि।

तत्र संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदेन षड्विधानि सूत्राणि प्राणायिषत। तत्तत्सूत्राणां स्वकीयं वैशिष्ट्यं वर्वर्त्त्येव येन लघुनोपायेन महार्घं शब्दसंसारं दोषलेशरहितं समुपस्थापयति। तत्र सूत्रप्रकारेषु अन्यतमः प्रकारः अधिकार इति ।

ननु कः खलु अधिकारपदार्थः ? कथङ्कारमधिकारो ज्ञायते ? किमस्य कार्यम् ? कथञ्चावधिनियमः ? किमस्य स्वरूपम् ? इति नैके शङ्काकलङ्कातङ्का आतङ्कन्ति नितरां शास्त्रमननमानसम्। तदिह प्रतुष्टूषामि मनाक् यथाशास्त्रं यथामति।

तत्र षड्विधेषु सूत्रेषु विलक्षणं सूत्रमिदमधिकारसूत्रम्। सर्वाणि सूत्राणि स्वोपदेशदेशे वाक्यार्थबोधं जनयन्ति परमधिकारसूत्राणां स्वोपदेशदेशे लक्ष्यजनकवाक्यार्थबोधो न भवति प्रत्युत स्वोत्तरवर्त्तिषु सूत्रेषु एकवाक्यतया लक्ष्यजनकवाक्यार्थबोधं सम्पादयन्ति। अत एव व्याख्याकृद्भिरेवं लक्षितम् -

**स्वस्थले लक्ष्यसंस्कारक-वाक्यार्थ-बोधाजनकत्वे सति स्वोत्तरवर्त्तिविधि-शास्त्रैकवाक्यतापर्णत्वमधिकारत्वम्** इति।

यथा - कारके इति अधिकारसूत्रमिदम्। करोति क्रियां निर्वर्त्तयतीति कारकं तस्मिन् कारके इति। अनेन लक्ष्यजनकवाक्यार्थबोधो न भवति। परमग्रिमेषु सूत्रेषु यथा - [१]कर्त्तुरीप्सिततमं कर्म इत्यादिषु गत्वा कर्त्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादित्यर्थं सम्पादयन्ति। एवमन्यान्यपि अधिकारसूत्राणि एवंविधानि। अयमधिकारः कथं ज्ञायते इति जिज्ञासायां पाणिनिना [२]"**स्वरितेनाधिकारः**" इति सूत्रमुपन्यस्तम्।

स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यमित्यर्थः। अर्थात् स्वरितचिह्नेन युक्तं पदमधिक्रियत इत्यर्थः। अधिकारो नाम विनियोग इति व्याख्याति कैयटः[३]। विनियोगो [४]व्यापृतिरिति बालमनोरमायाम्।

ननु अद्यत्वे सूत्रस्थं पदं स्वरितचिह्नघटितं न दृश्यते इति चेत् इदं प्रतिज्ञागम्यमिति नागेश उदीरति शेखरे। यथा प्रतिज्ञानुनासिक्याः पाणिनीयाः तथैव स्वरितमपि लक्ष्यदर्शनात् प्रतिज्ञायत इति भावः।

वस्तुतः सूत्रमिदं [५]किमर्थमुच्यते इति भाष्ये जिज्ञासितं यतोहि आकाङ्क्षादिवशात् प्रकृतसूत्रस्योत्तरसूत्रेषु सम्बन्धो भवत्येव तेनैव सर्वत्रापि व्यवस्था भवति पुनः स्वरितेन किमर्थमधिकारः उच्यते ? प्रतियोगं पौनःपुन्येन वक्तव्यं न भवत्यतः सूत्रमिदमावश्यकमिति प्रोक्तं समाधानभाष्ये। तदा प्रश्नभाष्येण पुनः जिज्ञासितं यद् प्रतियोगं न वक्तव्यमिति कथमस्मात् सूत्राज्ज्ञायते ? तदोच्यते लोकतः। तद्यथा अधिकृतोऽसौ ग्रामे अधिकृतोऽसौ नगरे इति लौकिकव्यवहारे ज्ञायते यो यत्राधिकृत स तत्र व्यापाराय गच्छति। तथैव सूत्रमिदमधिक्रियते

पदमिदमधिक्रियते इत्युक्तौ शब्दस्य प्रतियोगमुपस्थित्यतिरिक्ततया किमन्यत्प्रयोजनम्?

ननु लोके निर्दिश्यमान एव अधिकृतो बोध्यते। तद्यथा देवदत्ताय गौर्दीयतां यज्ञदत्ताय विष्णुमित्राय इति। अत्र यज्ञदत्ताय विष्णुमित्राय इत्यत्र पुनः गौर्दीयतामिति नोच्यते तथापि सोऽर्थोऽवगम्यते। तथैवेहापि शास्त्रे पदरुजविशस्पृशो घञ् (३/३/१६) इति सूत्रमुच्यते ततः सृ स्थिरे (३/३/१७) भावे (३/३/१८) इत्यादिभिरपि घञ् विधीयते इत्यर्थो गम्यते एव किमनेन सूत्रेण ?

ततः पुनर्वार्त्तिककार आह अन्यनिर्देशस्तु व्यावर्त्तकस्तस्मात् परिभाषा कर्त्तव्या। तद्यथा देवदत्ताय गौर्दीयतां यज्ञदत्ताय कम्बलो विष्णुमित्राय च इति। अत्र कम्बलदानं गोदानस्य निवर्त्तकं भवति। तथैवेहापि पाणिनीयशास्त्रे अभिविधौ भावे इनुण् () इति सूत्रे इनुण् इति पदे स्वरितं विधीयते तेन प्रागनुवर्त्तमानं पदरुजविशस्पृशो घञ् ()इत्यतः घञ् निवर्त्तते तेन अग्रिमे सूत्रष आक्रोशेऽवन्यार्ग्रहः इति सूत्रेण इनुण् तु भवति इष्यते च तत्र घञ् अपि। तदिदानीं निवृत्तं तदर्थं परिभाषा कर्त्तव्येति वार्त्तिककृदाशयः।

ननु स्वरितत्वप्रतिज्ञया यस्याधिकारत्वं सम्पाद्यते तस्य परिमाणज्ञानं न जायते एतावता अर्थात् कियत्पर्यन्तमधिक्रियत इति न ज्ञायते। अस्तु अधिकारज्ञानार्थं सूत्रमेतद्भवतु । तत्कथमिति चेत् यत्र स्वरितं दृश्यते तत् अधिकृतं पदं तस्मिन् क्रमे अग्रिमस्वरितं यावत् अस्याधिकारः ततः अग्रे अपरस्याधिकारः इति अवधिज्ञानं भवतीत्युच्यते। वस्तुतः स्वरिते न अधिकारः इति संहितापाठमाश्रित्य एवमुच्यते। परन्तु एवं पदच्छेदे अधिकारः केन शब्देन भवतीति प्रश्नः समुपतिष्ठते। तन्ननु लोकत एव सिद्ध्यतीत्युच्यते।

ततः समाधानभाष्येणोच्यते परिमाणज्ञानार्थं मास्तु अधिकारर्थमेव भवतु। तर्हि परिमाणज्ञानं कथं भवतीति चेत् यावतिथः अल् अनुबन्धः तावात्पर्यन्तं तस्याधिकारो भवतीति ज्ञायते।

यथा - द्वित्रिपूर्वान्निष्कात् (५/१/३०) इति सूत्रस्थं द्वित्रिपूर्वात् इत्यस्य अनुवृत्तिः अग्रिमसूत्रं प्रति गच्छति बिस्ताच्च (५/१/३१) इति सूत्रं यावत्। अर्थात् सूत्रद्वयस्याधिकारक्षेत्रम्, अतः प्रत्याहारे पठितः द्वितीयः वर्णः ''इकारः'' द्वित्रिपूर्वादित्यनेनानुबध्यते। द्वित्रिपूर्वादि इति न्यासः स्यात्तदानीम्। अनेन स्पष्टं ज्ञायते आचार्यः ''द्वित्रिपूर्वात्'' इत्यस्याधिकारं द्वितीयसूत्रं यावदिच्छति। परं समाधिरयं न फलेग्रहिः, यतोहि अल्पीयांसः अलः। अनुबन्धान् विहाय ४२ अल् पठिताः वर्णसमाम्नाये परमधिकारः कदाचित् ततोऽपि अधिकतरः स्यात्। तद्यथा - अङ्गस्य (६/४/१) इत्यधिकारः सप्तमाध्यायसमाप्तिपर्यन्तं गच्छति तथैव प्रत्ययः (३/१/१) परश्च (३/१/२) इत्यस्याधिकारः पञ्चमाध्यायसमाप्तिपर्यन्तं गच्छति। अतः अला अनुबन्धं कृत्वा अधिकारावधिः निश्चेतुं न शक्यते। ननु अधिकारावधिस्थले अमुकपर्यन्तस्याधिकारः इति वचनं वक्तव्यमिति चेत् तत्तर्हि सर्वत्र एवंविधव्यवस्थायां किमनेन सूत्रेण? शास्त्रेऽस्मिन् यत्र खलु सन्देहो भवति तत्र ननु शिष्टकृतव्याख्यानेन विशेषप्रतिपत्तिः भवति । एवञ्च व्याख्यानेनैव सर्वत्र व्यवस्थायां किमनेन सूत्रेण? इति सूत्रस्यानर्थक्यं प्रतिपाद्यते तदा समाधानभाष्येणोच्यते नूनमयं योगो वक्तव्यः। स्वरितेनाधिकारगतिः यथा विज्ञायेत। अर्थात् नूनं सूत्रमिदं वक्तव्यं सन्त्यत्र प्रयोजनानि। प्रथमं प्रयोजनं तावत् अधिकारगतिः अर्थात् अधिकारज्ञानं तद्यथा - गोस्त्रियोरुपसर्जनस्य (१/२/४८) इति सूत्रे गोटाङ्ग्रहणं कृन्निवृत्यर्थम् इत्युच्यते

येन कृत्स्त्रियः धातुस्त्रियो ह्रस्वो मा भूत् । परं यदा गोस्त्रियोरुपसर्जनस्य इति सूत्रस्थं ''स्त्री'' पदं स्वरितयुक्तं क्रियते तदा ''गोटाङ्ग्रहणं कृन्निवृत्यर्थम्'' इति वचनं न वक्तव्यं यतोहि स्त्रीपदे स्वरितत्व-प्रतिज्ञया [६]''**स्त्रियाम्**'' इत्यधिकारे ये प्रत्यया: विहिता: तेषामेव ग्रहणं भवति न तु कृत्सम्बन्धी न वा धातुसम्बन्धी। अत: तद्वचनं न कर्त्तव्यम् । सूत्रस्य द्वितीयं प्रयोजनं तावत् अधिकं कार्यम्। तद्यथा - अपादानं नाम यत्र प्राप्तिपूर्वकनिवृत्ति: तत्रापादानमिष्यते। यथा ग्रामादायाति नगरादायाति इत्युक्तौ आगन्ता आदौ ग्रामं नगरं वा प्राप्य पुन: तत: निर्वर्त्तते अत: अपादानसंज्ञा। परन्तु साङ्काश्येभ्य: पाटलिपुत्रका: अभिरूपतरा: इत्यत्र प्राप्तिपूर्वकनिवृत्यभावात् कथङ्कारं तत्रापादानमिति चेत् बुद्धिस्थप्राप्तिं प्रकल्प्य ततो निवृत्तिरिति उच्यते तच्च अपादानस्य स्वरितत्वे सिद्ध्यति । अधिकं कार्यं भवतीति कृत्वा बुद्धिस्थप्राप्तिपूर्वकनिवृत्तावपि अपादानमुच्यते। एवञ्चाधिकारस्य द्वैतीयीकं प्रयोजनमिदम् अधिकं कार्यमिति ।

तत: अधिक: कार: तद्यथा [७]''विप्रतिषेधे परं कार्यम्'' इति सूत्रेण परविप्रतिषेध उच्यते । तत्र सूत्रे परशब्द इष्टवाची अत: [८]''वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन'' एवञ्च [९]''नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'' इत्यादय: विधय: सिद्ध्यन्ति। एतत्सर्वं स्वरितत्वप्रतिज्ञयैव सिद्ध्यति अत: पुनर्वचनं न वक्तव्यं भवति। यदि नुम् नुटिवधायकेषु सूत्रेषु स्वरितमुच्यते तदा कदाचित् पूर्वविप्रतिषेध: कदाचिच्च परविप्रतिषेध इष्टानुगुणं सिद्ध्यति। ननु अधिक: कार: इत्युक्तौ कथं पूर्वविप्रतिषेधवचनं न वक्तव्यमिति चेत्? लोकत:। तद्यथा लोके उच्यते अधिकमयं करोति योऽयं दुर्बल: सन् बलवद्भिस्सह भारं वहति। एवमिहापि पाणिनीयशास्त्रे स्वरितत्वयुक्तं पदम् अधिकं करोति इत्युक्तौ पूर्वं पठित: सन् परं बाधते, परं पठित: सन् पूर्वं बाधते इत्यर्थ:। अधिकारगतिं ज्ञापयितुं भाष्ये वर्त्तिकमिदमुच्यते -

अधिकारगतिस्त्र्यर्था विशेषतयाऽधिकं कार्यम् ।
अथ योऽन्योऽधिक: कार: पूर्वविप्रतिषेधार्थ: स:।।

अयमधिकारस्त्रिविध इति [१०]**षष्ठीस्थानेयोगा** इति सूत्रे भाष्ये भाष्यकृद्भि: प्रावाचि। तद्यथा -

अधिकारो नाम त्रिप्रकार:। कश्चिदेकदेशस्थ: सर्वं शास्त्रमभिज्वलयति, यथा प्रदीप: सुप्रज्वलित: सर्वं वेश्माभिज्वलयति। अपरोऽधिकार: यथा - रज्ज्वा अयसा वा इदं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकार: प्रतियोगं तस्यानिर्देशार्थं इति योगे योगे उपतिष्ठते इति ।

अर्थात् यथा अधिकार: पारार्थ्य: तथैव परिभाषाऽपि विधिशास्त्रैकोपकारकत्वात् अधिकारप्रकारक इति निगदति भाष्यकृत्। एवं चकारेणापि अधिक्रियते तद्यथा द्विगुश्च इति सूत्रेण द्विगुरपि तत्पुरुषसंज्ञ: स्यादित्युच्यते। अत्र चकारेण तत्पुरुषस्याधिकार उच्यते। अयं द्वैतीयीक: अधिकार:। तार्तीयीकोऽधिकारस्तु स्वरितेनाधिकार इति सूत्रेण योऽधिकार उच्यते स:।

**सन्दर्भ: -**

१. अ. १-४-४९ (का.प्र.)
२. अ. १-३-११ (प.प्र.)

३. स्वरितेनाधिकार: सूत्रभाष्ये प्रदीपे

४. बालमनोरमायाम्

५. महाभाष्ये, १/३/११

६. अ. ४-१-३

७. अ. १-४-२

८. इकोऽचि विभक्तौ इति सूत्रे वार्त्तिकम् (सि.कौ.)

९. रात्सस्य इति सूत्रे वार्त्तिकम् (सि.कौ.)

१०. म. भा. १ अ.१ पा. ७. आह्निकम्

**परामृष्टा: ग्रन्था: -**


१. व्याकरणमहाभाष्यं सप्रदीपोद्यतम्

२. काशिका न्यासपदमञ्जरीसहिता

३. लघुशब्देन्दुशेखर:

४. वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीसहिता

५. परिभाषेन्दुशेखर:



*सहायकाचार्यो व्याकरणविभागे*

*श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली*

*दरभङ्गा - ८४७२०१ (बिहारम्)*

# अधिकारसूत्रेषु ''स्त्रियाम्'' - एकमालोचनम्

***डॉ. प्रशान्तकुमारमहला***

को नाम अधिकार: इति प्रश्ने उच्यते, विधिसूत्रैकवाक्यतया बोधजनकत्वमधि-कारत्वम्। अथवा स्वदेशे वाक्यार्थबोधकमुत्तरोत्तरसूत्रेषु स्वघटकपदसम्पर्कमधिकारसूत्रम्। यथा - ''चादयोऽसत्त्वे'', ''प्रादय'' इत्यादिसूत्रेषु ''प्राग्रीश्वरान्निपाता:'' इति सूत्रेण, ''निपाता:'' इति पदस्य सम्पर्क:। अधिकारो नाम विनियोग: । विनियोगो लोके अधिकार उच्यते। प्रेरणे तद्विषयीभूतकार्यं वा लौकिकोऽधिकार:। पतञ्जलिना अधिकारशब्देन प्रतियोगमुपस्थापनमुच्यते। वार्तिककाराणामपि एष एव विचार:।

अधिकार: त्रिविध: । यथा - कश्चिदेकदेशस्थ: सर्वं शास्त्रमभिज्वलयति यथा प्रदीप: सुप्रज्वलित: सर्वं वेश्ममभिज्वलयति । द्वितीये यथा - रज्वादिवद्धं काष्ठमनुकृष्यते तद्वद् चकारेणानुकृष्यते - ''हशि च'' इत्यादौ । तृतीयस्तु चकारं विनापि प्रतियोगमुपतिष्ठते। यथा - ''अङ्गस्य'' इति।

केषांचित् विदुषां मते अधिकारो नाम उत्तरोत्तरगमनम्। परन्तु लक्षणमिदं प्रायिकं भवति । कारणं ''स्वरितत्वप्रतिज्ञा'' इति कारणेन न केवलमनुवृत्तिर्भवति, किन्तु अपकर्षोपि दृश्यते।

व्याकरणान्तरेष्वपि अधिकारस्त्रिविध इत्युल्लिखितोऽस्ति। यथा - मुग्धबोधभूमिकायाम् सिंहावलोकित:, मण्डुकप्लुति:, गङ्गास्त्रोतप्रवाहश्च। अधिकारसूत्रेषु ममालोच्य विषय: ''स्त्रियाम्'' इति सूत्रम्।

**स्त्रियाम् - ४.१.३**

षड्विधेषु सूत्रेष्विदमधिकारसूत्रम् । ''समर्थानां प्रथमाद्वा'' ४.१.८२ इति सूत्रं यावत् अस्याधिकार:। स्त्रीप्रत्ययप्रकरणस्य प्रथमं सूत्रमिदम्। अत: ''ङ्याप्प्रातिकात्'' इत्यत: ''प्रातिपदिकात्'' इत्यस्य सम्पूर्णं स्त्रीप्रत्ययप्रकरणं प्रति अधिकारो वर्तते। ''प्रत्यय:'' ''परश्च'' इत्यनयो: अत्राधिकारोऽस्ति। अधिकारसूत्रस्यावधि: निर्दिष्टा वर्तते। अत: अष्टाध्याय्याम् अस्यावधि: ''समर्थानां प्रथमाद्वा'' इति सूत्रं यावत् वर्तते। अधिकारो यद्यपि ''समर्थानां प्रथमाद्वा'' इति सूत्रं यावत् तथापि प्रतियोगमुपस्थापनमुच्यतेऽधिकार: इति नियमेन ''तद्धिता:'' ४.१.७६ इति सूत्रपर्यन्तं प्रत्येकेषु द्विसप्ततिसूत्रेषु ''स्त्रियाम्'' इति पदमुपतिष्ठते ।

**लौकिकलिङ्गलक्षणम् -**

इदानीं प्रश्नो भवति व्याकरणशास्त्रे लिङ्गव्यवस्थापनार्थं को नियम: ? प्राचीनवैयाकरणै: विषयेऽस्मिन् सूक्ष्मविचारो विहित:।

भाषाया: विकाशेन सह शब्दानां लिङ्गनिर्धारणं लौकिकलिङ्गमाधारीकृत्य भवेदिति अनुमातुं शक्यते । लौकिकलिङ्गमाधारीकृत्य भाष्यकार: ''स्त्रियाम्'' इति सूत्रस्यारम्भे इमं श्लोकवार्त्तिकमुपस्थापयति -

स्तनकेशवती स्त्री स्याल्लोमश: पुरुष: स्मृत:।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ।।

महाभाष्यकारस्य अयमेवाशयो यत् स्तनकेशौ स्त्रिय: प्रतीकौ, लोमप्राचुर्यं पुरुषस्य लक्षणमिति । उभयो:

अन्तरं नाम सादृश्यं, स्त्रीपुंसयोः सदृशं भवति चेत् नपुंसकत्वमुच्यते। श्लोकवार्त्तिकानुसारं शब्दानां लिङ्गनिर्धारणार्थं यदि लौकिकलिङ्गमेव आधारत्वेन स्वीक्रियते तर्हि लिङ्गव्यवस्था अनुपपन्ना भवेत्। इत्थं लिङ्गलक्षणस्वीकारे का विसंगतिर्भवेत् कथयति भाष्यकारः -

लिङ्गात् स्त्रीपुंसयोर्ज्ञानं भ्रूकुंसे टाप् प्रसज्यते।
नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिद्ध्यतः।।

अर्थात् स्तनकेशवत्वं लिङ्गस्याधारस्वीकारे ''भ्रूकुंसे'' (स्त्रीवेषधारी नटः) टाप् प्रसज्येत। यतो हि नाटके पुरुषोऽपि स्त्रीवत् स्तन-केशयुक्तो भवति। तथैव खरकुटी + शस् इत्यवस्थायां ''तस्माच्छसो: नः पुंसि'' इत्यनेन सकारस्य नत्वं भवेत् । खरकुटी-नापितस्य गृहम्। नापितगृहं सदैव केशैर्युक्तं भवति । अतो लोमशः।

पुनश्च उपर्युक्तलक्षणानुसारं खट्वा इत्यस्य (खट्वशब्दस्य स्त्रीलिङ्गे) वृक्षशब्दस्य च लिङ्गनिर्धारणं न स्यात्। खट्वाया स्तनकेशवत्वाभावात्। वृक्षस्य लोमशत्वाभावात्। ''तदभावे नपुंसकम्'' इति वचनात् खट्वा-वृक्षयोः नपुंसकत्वापत्तेः।

नापुंसके भवेत् तस्मिन् तदभावे नपुंसके ।
असत्तु मृगतृष्णावत् गन्धर्वनगरं यथा ।।

खट्वावृक्षादौ स्त्रीत्वलक्षणस्य स्तनकेशवत्वस्य, वृक्षे लोमशत्वाभावात् ''तदभावे नपुंसकम्'' इति वचनेन उभयोः नपुंसकत्वापत्तेः। यदि उच्येत यथा मृगतृष्णायां जलस्याभावेऽपि जलस्य अध्यासो भवति।

एवमेव गन्धर्वनगरस्य वस्तुतः अविद्यमानतायामपि यथा काल्पनिकोऽर्थ स्वीक्रियते तथैव अचेतनवस्तुषु पदार्थेषु वा लिङ्गप्रत्यायकस्य चिह्नस्य अविद्यमानत्वेपि चेतनगतलिङ्गमारोप्य इष्टसिद्धिः स्यादिति चेत्, उच्यते। मृगमरीचिकादौ सादृश्यमाधारीकृत्य जलस्यारोपो भवति। गन्धर्वनगरं कल्पनाप्रसूतत्वेन शशशृङ्गवत् बौद्धार्थमादाय कार्यनिर्वाहो भवति । किन्तु खट्वा-माल-वृक्षादिषु अचेतनपदार्थेषु स्त्रीगतलिङ्गस्य किमपि सादृश्याभावत् लिङ्गविशेषस्यारोपः नितरामसम्भव इति चेत्, उच्यते -

आदित्यगतिवत् सन्न वस्त्रान्तर्हितवच्च तत् ।
तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः।।

अर्थात् यथा सूर्ये गतिसत्ताविद्यमानत्वेपि ''सूर्यः चलति'' इति प्रत्यक्षेण नोपलभ्यते देशान्तरप्राप्त्या तु अनुमीयते। वस्त्राच्छादितस्य पदार्थस्य वस्तुतः सत्ताविद्यमानतायामपि यथश वस्त्रान्तरितस्य पदार्थस्य सत्ता नोपलभ्यते तथैव खट्वादिषु अचेतनपदार्थेषु लिङ्गस्य विद्यमानतास्ति। परन्तु तन्न प्रत्यक्षी भवति। अत्रेदमावतात्पर्यं यत्-खट्वायां वृक्षे च तत्तलिङ्गप्रत्यायकानि चिह्नानि सन्ति किन्तु सूर्यस्य गतिवत्, वस्त्रान्तरितवस्तुवत् तल्लिङ्गस्य प्रत्यक्षो न भवति । इदानीं प्रश्नो जायते विद्यमानस्य अनुपलब्धिस्वीकारः समीचीनो नवेति ? अत्र भाष्यकारः इमं प्रश्नं समाधत्ते -

षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति। (१) अतिसन्निकर्षात्, यथा - स्वचक्षुर्गतस्याञ्जनादेः(२)

अतिविप्रकृष्टात्, यथा - उड्डीयमानस्य शकुनेः (३) मूर्त्यन्तरव्यवधानात्, यथा - कुड्यादिव्यवहितस्य सुवर्णादेः। (४) तमसावृत्तत्वात्, अन्धकारावृत्तत्वाद्वा। यथा - अन्धकाराक्रान्तस्य घटादेः (५) इन्द्रियदौर्बल्यात्, तिमिराद्युपघाते चक्षुरादेः। अपि च (६) अतिप्रमादात्, ''प्रमादोऽनवधानता'' विषयान्तरव्यासक्तचित्तो हि सन्निकृष्टमप्यर्थं नोपलभ्यते । सौक्ष्म्यं तु इन्द्रियदौर्बल्यम् एवान्तर्भूतम् । एभिः कारणैः खट्वा-वृक्षादिषु विद्यमानस्य स्त्रीलिङ्गप्रत्यायकं चिह्नं न दृश्यते इति। इदानीं पुनः प्रश्न एषु अदर्शनहेतुषु खट्वा-वृक्षादिषु कस्य हेतुत्वं स्वीकरिष्यामः येन उभयोः खट्वावृक्षयोः लिङ्गप्रत्यायकं चिह्नं प्रतीतिर्न भवतीति चेत्, उच्यते - ''तयोस्तु तत्कृतं दृष्ट्वा'' इति। अत्र महाभाष्यकारः कथयति - खट्वाशब्दात् स्त्रीत्वप्रयुक्तं कार्यं (खट्वा टाप् खट्वा) दृष्ट्वा निश्चीयते यत् खट्वाशब्दः स्त्रीलिङ्गमिति।

वृक्ष सु वृक्ष इति कार्यं दृष्ट्वा ज्ञायते यत् वृक्षशब्दः पुंलिङ्गमिति । यथा - ''आकाशेन ज्योतिषः''। मेघाच्छन्नेऽपि यथा पृथिव्याः औजाल्यं दृष्ट्वा अनुमीयते आकाशे ज्योतिरस्ति। यतो हि पृथिव्याः औजाल्यार्थं सूर्य-ज्योतिष्कादयः कारणानि भवन्ति। इदानीं मेघाच्छन्नत्वेऽपि यथा तेषां ज्योतिष्कानां सत्ताऽनुमानेन सिद्धिर्भवति तथैव अत्रापि खट्वावृक्षादौ अवगन्तव्यमिति चेत् ।

अन्योऽन्यसंश्रयं त्वेतत् प्रत्यक्षेण विरुद्ध्यते ।<br>
तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति ।।

यदि तत्कृतशब्दप्रयोगेण (स्त्रीकृतं शब्दं दृष्ट्वा स्त्रीत्वमवसीयते, पुंस्कृतं दृष्ट्वा मुपानिति) लिङ्गं निर्धारयामः तर्हि अन्योन्याश्रयो दोषः स्यात्।

अत्रेदमेव तात्पर्यं-स्त्रीत्वेन अर्थात् टाप् प्रयुक्तेन खट्वा इति शब्दो भवति । खट्वा इति शब्दरूपं दृष्ट्वा स्त्रीत्वमवसीयते । अतः अन्योन्याश्रयत्वम्। ''इतरेतराश्रयाणि न प्रकल्पन्ते'' अथवा ''अन्योन्याश्रयाणि कार्याणि शास्त्रे न प्रथन्ते'' इति ।

पुनश्च पृथिव्याः औजाल्यं सूर्यप्रकाशश्च युगपदेव प्रत्यक्षीक्रियते । अत्र लिङ्गकार्यं टापं दृष्ट्वा स्त्रीलिङ्गकारणमनुमीयते। परन्तु खट्वा इति शब्दे अयं कार्यकारणभावः कदापि युगपत् प्रत्यक्षो न भवति। अस्याः (खट्वायाः) कार्यताज्ञानं कारणज्ञानाधीनम् अपि च कारणताज्ञानं कार्यताज्ञानाधीनम्। अतः अत्र प्रत्यक्षस्यापि विरोधो जायते। न हि शक्यते वक्तुम्-भिक्षुगृहं गजवत् देशत्वाद्गजशालावत्, प्रत्यक्षेणेन्द्रियदौर्बल्यात्तु गजो नोपलभ्यते इति। (यतो हि इतः पूर्वं अस्माभिरालोचितं गन्धर्वनगरम्, आदित्यगतिः, वस्त्राच्छादितवस्तुस्वरूपमित्यादीनि। एषु स्थलेषु प्रत्यक्षता नासीत् परन्तु विद्यमानता आसीत्। प्रत्यक्षबाधनस्य षड्हेतवः प्रतिपादिताः सन्ति। इन्द्रियदौर्बल्यादत्र न प्रत्यक्षो भवति इति । इन्द्रियदौर्बल्यं कदाचिदुपलब्धस्य कदाचिदनुपलम्भे कारणं शक्यमभिधातुम् । परन्तु यस्य प्रत्यक्षो भवति तत्र अनुपलब्धेः स्वीकारः अनुचितः।)

यत् कथितमस्ति खट्वा-वृक्षादौ लिङ्गस्य सत्तायामपि उपलब्धिर्न भवतीति । तत्र स्वस्य चक्षुरिन्द्रियस्य बाधो भवति। परन्तु एतन्न समीचीनम्। प्रत्यक्षे इन्द्रियस्य विरोधो न भवेत्।

न्यायशास्त्रे अनुमानं यथार्थानुभवस्य कारणत्वेन स्वीक्रियते। परन्तु यदि अनुमानेन सिद्धस्यानुभवः

प्रत्यक्षस्य विपरीतो भवति (प्रत्यक्षेण विरुद्धयते) तर्हि तादृशो हेतु: बाधितहेत्वाभासेषु अन्तर्भूतो भवति। अपि च तदनुभव: यथार्थो न स्यात्।

''यस्या साध्याभाव: प्रमाणान्तरेण पक्षे निश्चित: स बाधित:। यथा - वह्निरनुष्णो द्रव्यत्वात्।'' (अनुमानखण्ड:) अत: खट्वा इत्युदाहरणे लिङ्गसत्तास्ति परन्तु गन्धर्वनगरवत् नोपलभ्यते इति वक्तुं न शक्यते। अस्मात् सिद्धो भवति यत् शास्त्रे लौकिकलिङ्गं नाश्रीयते।

पुनश्च शास्त्रे लौकिकलिङ्गत्वस्वीकारे अपरैका विसंगतिर्समायाति। तटशब्दात् त्रिविधं लिङ्गजनितं कार्यं दृष्ट्वा (तट:, तटी, तटम्) क: निश्चियते अयं पुंलिङ्गम्, इयं स्त्रीलिङ्गम्, इदं नपुंसकलिङ्गमिति। एकस्मिन् पदार्थे सर्वेषां लौकिकलिङ्गानामवस्थानं नितरामसम्भवात्। अत: भाष्यकार: सिद्धान्तरूपेण लिङ्गनिर्णयार्थं कथयति -

संस्त्यानप्रसवौ लिङ्गमास्थेयौस्वकृतान्तत: ।
संस्त्याने स्त्यायते ड्रट् स्त्री सूते सप् प्रसवे पुमान् ।।

अस्या: कारिकाया: अयमेवार्थ:-संस्त्यान-नाम संचय:, राशि:, सामीप्यम्, प्रसार: विस्तारश्चाद्यर्थवशात् स्त्रीत्वम्। अपि च प्रसव-नाम उत्पत्यादिकारणत्वेन पुंसत्वम् इति । संस्त्यान इत्यत्र ष्ट्यै शब्दसंघातयो: (स्त्यै:) इत्यस्माद्धातो: ड्रट् प्रत्यये अनुबन्धलोपे ङीपि स्त्री इति शब्दो निष्पद्यते। प्रसवार्थे विद्यमानात् ''पू'' इत्यस्माद् धातो: औणादिको डुम्सुन् प्रत्यये धातो: स्वरस्य ह्रस्वे च कृते पुमान् इति शब्दो निष्पद्यते। अत: संस्त्यानविवक्षायां स्त्रीत्वं, प्रसवविवक्षायां पुंसत्वमिति समुचित समाधानम्। न तु स्तनकेशवती नारी इति। अत: भाष्ये ''लोकेऽपि स्त्यायतेरेव स्त्री सूतेश्च पुमान्? अधिकरणसाधना लोके स्त्री। स्त्यायत्यस्यां गर्भ इति। कर्तृसाधनश्च पुमान्। सूते पुमानिति।''

अत्रेदमेवतात्पर्यं - भाष्यकारस्य मतानुसारं स्त्रिय: सम्बन्ध: ''स्त्यायति'' इत्यनेन सह वर्तते। अत: शास्त्रीयस्त्रीत्वस्यापि सम्बन्ध: तेन सह (स्त्यायति इत्यनेन) स्वीकर्तव्य:। यथा लौकिकपुरुषस्य सम्बन्ध: ''सूते'' इति क्रियया सह भवति तथैव शास्त्रीयपुरुषस्यापि सम्बन्ध: तेन सह स्वीकर्तव्य: । लोके स्त्री अधिकरणसाधनम् यतो हि तस्यां गर्भसंस्त्यानं भवति। पुरुषो भवति कर्ता। यतो हि स उत्पादयति। परन्तु शास्त्रीयार्थे उभौ भावसाधनौ। संस्त्यान-स्त्री। प्रवृत्तिश्च पुमान् अर्थात् गुणानां संस्त्यानस्त्री, गुणानां प्रवृत्ति: पुमान्।

पदार्थानां प्रवृत्ति: लिङ्गलक्षणमिति वैयाकरणा:। सांख्यसिद्धान्तानुसारं प्रकृते: सत्व-रजस्तम इत्याख्या त्रयोगुणा: सन्ति। प्रतिपदार्थेषु गुणत्रयाणां विपरिणामो दृश्यते। गुणानां विपरिणामवशात् लिङ्गं धार्यते। सत्त्वादिगुणानामाधिक्ये पुंलिङ्गम्। ''प्रसवविवक्षायां पुमान्'' इति । संस्त्यान विवक्षायां स्त्री। (गुणत्रयाणां न्यूनतायां स्त्रीत्वम्) उभयोरविवक्षायां नपुंसकम्।

''तस्योक्तौ लोकोतो नाम गुणो वा लुपि युक्तवत्''। अर्थात् स्त्रीत्वं पुंस्त्वम् इत्युक्तौ गुणतारतम्यम् एव कारणम्। यथा - ''लुपि युक्तवत्व्यक्तिवचने'' इति सूत्रे आश्रीयते। लिङ्गं कदापि प्रयोक्ताश्रयो न

भवति। किन्तु शिष्टजनाश्रयो भवति। ''तदशिष्यं संज्ञाप्रमाणत्वात्''। अत्र यथा गुणपदेन सत्व-रजस्-तमसां ग्रहणं भवति तथैव शब्द-स्पर्श-रूप-रस-गन्धानीनामपि ग्रहणं स्यादिति चेत्, सांख्यदर्शनमिव सृष्टिप्रक्रियां स्वीकृत्य शब्दानां लिङ्गसम्बन्धिसमस्याया: समाधानं करोति कैयट: इत्थम्-अत्र गुणपदेन सत्व-रजस्तमसामेव ग्रहणम्। संस्त्यान इति शब्दस्यार्थो भवति तिरोभाव:। प्रवृत्ति इति शब्दस्यार्थ आविर्भाव:। गुणानां तिरोभाव: स्त्रीत्वम्, गुणानामाविर्भाव: पुंस्त्वम्। गुणानां साम्यावस्था नपुंसकत्वम्। गुणानामियमवस्था शब्दगम्या एव। उपचयापचयशब्दौ सापेक्षिकौ भवत:। उपचय इत्युच्चारणेन कस्मादुपचय: इति जिज्ञासा जायते।

अस्योत्तरे उच्यते-परस्परात् उपचयापचयो वा बोधव्य: । तथैव गुणानां प्रवृत्ति: उपचयो वा पुंस्त्वस्य लक्षणम्, गुणानां संस्त्यानम् अपचयो वा स्त्रीत्वलक्षणम्। गुणानां स्थिति: साम्यवस्था वा नपुंसकत्वम्। सत्व-रजस्तम: प्रकृते: गुणा:। अत: प्रकृतिजन्येषु सर्वेषु पदार्थेषु त्रयो गुणा: विद्यन्ते। अत एव अयं पदार्थ:, इयं व्यक्ति:, इदं वस्तु इति त्रिविधलिङ्गभेदेन प्रयोगो दृश्यते। इत्थं स्वीकारे यद्यपि सर्वेषां शब्दानां लिङ्गत्रयत्वापत्तिर्स्यात् तथापि कस्यचिद् विशेषशब्दस्य कश्चन विशेषलिङ्गस्याभिव्यक्ति: यो शिष्टै: प्रयुक्त: अथवा लिङ्गानुशासने प्रदर्शितं तदेवानुसर्तव्यम्। लिङ्गविषये कात्यायन: कथयति - ''लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य''।

वार्त्तिककारस्यायमेवाशय: शब्दानां लिङ्गव्यवस्था शास्त्रेण भवितुं नार्हति। यतो हि शास्त्रीयनियम: सकृदेव भवति। भाषागतिशीलात्वेन लिङ्गव्यत्यय: स्वाभाविक:। पाणिनीयव्याकरणं यत् कार्यं लोके सिद्ध्यति तस्यान्वाख्यानं न करोति, परन्तु लोकात् यन्न सिद्ध्यति तेषां कृते इत्संज्ञासवर्णसंज्ञा-प्रातिपदिकसंज्ञादिकमन्वाख्यायति । अत: पाणिनीयव्याकरणं लोकानुगामी वर्तते। फलत: लिङ्गनिर्धारणे लोक एव प्रमाणम्।

शास्त्रीयव्यवस्थां विना लोकव्यवहारात् यत्र लिङ्गनिर्धारणं भवति तत्र लोकानुसरण: श्रेय:। यत्र लोकव्यवहारे कापि अनुपपत्तिर्भवति तत्र लिङ्गानुशासननामकं शास्त्रं प्रमाणत्वेन स्वीक्रियते। किञ्च ''एकार्थे शब्दान्यत्वाल्लिङ्गान्यत्वम्'' इति भाष्यकृता यदुक्तं तेन एकस्मिन् पदार्थे तट:, तटी, तटम् इत्याख्यं भिन्नलिङ्गीशब्दानां प्रयोगो भवति ।

**लिङ्गम् कस्यार्थ ?**

एतानि त्रीणि लिङ्गानि प्रातिपदिकार्था:, अर्थात् शब्दनिष्ठान्येव। पञ्चकं प्रातिपदिकार्थ: इति पक्षे स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकमिति पञ्चकं प्रातिपदिकार्थ:।

अत: लिङ्गमपि प्रातिपदिकार्थ:। तेन लिङ्गबोधनार्थं स्त्रीप्रत्यया: न भवन्ति अपितु प्रातिपदिकात् स्त्रीत्वविवक्षायां स्त्रीप्रत्यया: भवन्ति।

अनेन स्त्रीत्वं न प्रत्ययार्थ: परन्तु प्रकृत्यर्थ एव। यदा प्रातिपदिकात् स्त्रीत्वं द्योत्यते तदा स्वार्थे स्त्रीप्रत्ययो भवति। यदि स्त्रीत्वं प्रत्ययार्थस्वीक्रियते तर्हि मातृ-स्वसृ-दुहितृ-गो-वागादीनां स्त्रीत्वबोधकप्रत्ययाभावात् स्त्रीत्वाभाव: प्रसज्येत। अत: ''अजाद्यतष्टाप्'' इत्यस्य वृत्तौ अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यादित्युक्तमस्ति। अत्र सूत्रे अधिकृतं यत् ''स्त्रियाम्'' इति पदं तत्तु भावसाधनम् । यस्यार्थ:

स्त्रीत्वे द्योत्ये इति। महाभाष्येऽपि ''स्त्रियां यत् प्रातिपदिकं वर्तते तस्मात् टाबादयो भवन्ति स्वार्थे''। प्रातिपदिके स्त्रीत्वमादौ तिष्ठति। यतो हि पञ्चकं प्रातिपदिकार्थ इति पक्षे लिङ्गमपि प्रातिपदिकार्थः । अतः स्त्रीत्वे द्योत्ये स्वार्थे स्त्रियाम् इति सूत्राधिकारे टाबादयः प्रत्ययाः भवन्ति इति ।

सहायकग्रन्थसूची -

१. दीक्षितभट्टोजी, वैयाकरणसिद्धान्तकौमुदी, सम्पा, गोविन्दाचार्यः, द्वितीयभागः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६।

२. पतञ्जलिः, महाभाष्यम्, पञ्चमोभागः, सम्पा. आचार्यः सुद्युम्नः, रामलाल कपूर ट्रष्ट, सोनीपत्, हरियाणा, २००९।

३. काशिकावृत्तिः, तृतीयोभागः, सम्पा. द्वारिकाप्रसादशास्त्री, सुधीप्रकाशनी, वाराणसी, १९८४ वरदराजः, लघुसिद्धान्तकौमुदी, षष्ठभागः, सम्पा. भीमसेनशास्त्री, भौमीप्रकाशनी, दिल्ली, २००५।

४. पाणिनीः, अष्टाध्यायी, सम्पा. पुष्पादीक्षितः, संस्कृतभारती, नवदेहली, २०१०।

५. पाढी किशोरचन्द्रः, पाणिनीयव्याकरणे योगविभागो विमर्शः, भारतीय बुककार्पोरेशन्, दिल्ली, २००१।

*सहायकाचार्यः*

*रायगञ्जविस्वविद्यालयः, पश्चिमवङ्गः*

# कारके (१.४.२३)

डॉ. सुरेश कुमार जेना

कारकविभक्तिस्वरूपविवरणावसरे कारकत्वलक्षणमत्रशोधपत्रे प्रस्तुतीकरणाय, कारकत्वलक्षणप्रतिपादनाय च कारके इत्याधिकृत्य किञ्चिदिव विचार्यते।

'कारके' इति अधिकारसूत्रम्, अत्र सप्तमीविभक्तिः न आधारोपस्थापिका अपितु ''द्वन्द्वे च'' इति सूत्रवत् प्रतिपदिकार्थप्रयोजिका अर्थात् व्यत्ययेन प्रथमार्थे सप्तमी अत्र विहिता। अतः उत्तरत्र ''कारकम्'' इति उच्यते। सूत्रमिदं न केवलम् अधिकारसूत्रम् अपितु ''प्रत्ययः'' इति सूत्रवत् संज्ञाधिकारसूत्रपि । अनेन एतत् ज्ञायते ''कारके'' इत्यस्य अर्थः कारकम् इति ।

**कारकस्वरूपम् :-**

किं नाम कारकम् इति जिज्ञासायां महाभाष्यकारानुसारं ''कारकम्'' एकम् अन्वर्थसञ्ज्ञकं पदं भवति। महाभाष्ये कथ्यते साधकं नाम निवर्तकं कारकसंज्ञं भवति। तत्र उद्योते नागेशः कथयति - ''साधकं नाम निवर्तकम्। कस्य साधकम् इति जिज्ञासायाम् उच्यते - क्रियायाः साधकं यत् निर्वर्तकं कारकं भवति। अर्थात् क्रियायाः निर्वर्तकं नाम क्रियायाः जनकं कारकं भवति। पुनश्च भाष्यकाराः कथयन्ति कारकमिति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम् ''अन्वर्थसंज्ञा विज्ञायते करोतीति कारकम् (१.४.२३)। अन्येऽपि आचार्याः विस्तृतभावेन कारकार्थस्य व्याख्यानं कृतवन्तः। तत्र सरस्वती कण्ठाभरणे (१.१.३२) भोजेनोक्तम् ''क्रियानिमित्तम् कारकम्। एतदपि हेमचन्द्रेण हैमशब्दानुशासने (२-२-१) उक्तम्। कलापव्याकरणे तत्र उच्यते - ''यत् क्रियानिमित्तमात्रं प्रधानम् वा तत् कारकम् (कारके.२२१)। निमित्तमत्र निष्पति कारकम् यदुच्यते ''क्रियानिष्पतिकारकं कर्तादि कारकसंज्ञं भवति। नागेशोऽपि मञ्जूषायां कथयति - क्रियानिष्पादकत्वं कारकत्वम्। हरिनामामृते जीवगोस्वामिपादाः कथयन्ति - ''क्रियासम्बन्धविशेषि कारकम्। वात्स्यायानः न्यायभाष्ये (२-१-१६)। अधिकं स्पष्ठीकृत्य कथयति - ''एवञ्चसति न द्रव्यमात्रं कारकं, न क्रियामात्रं किं तर्हि क्रियासाधनं क्रियाविशेषयुक्तं कारकम्, यत् क्रियासाधनम् स्वतन्त्रं कर्त्ता न द्रव्यमात्रं न क्रियामात्रं, क्रियया आप्तुं इष्यमाणं कर्म न द्रव्यमात्रं न क्रियामात्रम्। एवं साधकतयादिष्वपि न्यायभाष्यम् (२-१-१६)।

**लक्षणविमर्शः -**

साम्प्रतम् लक्षणानाम् आलोचनम् क्रियते। महाभाष्यकारणाम् कारकलक्षणं भवति ''करोतीति कारकम्। अर्थात् क्रियां जनयति। यत् क्रियायाः जनकं तत् कारकम्। क्रियाजनकत्वं कारकत्वम् इति सामान्यं लक्षणम्। जनकतायाः तात्पर्यं भवति कारणता। एतावता ''क्रियानिष्ठकार्यतानिरूपितकारणतावत्त्वं कारकत्वम्। तेन ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इति वाक्ये क्रियायाः कारणता अन्यथासिद्धत्वात् ब्राह्मणे नास्ति। क्रियायां जनकाकांक्षा तथा कारके जन्याकाङ्क्षा विद्यते। अतः कारकस्य क्रियायाम् अन्वयः करणीयः। केचित् ''साक्षात् क्रियाजनकत्वं कारकत्वम् इति कथयन्ति। परन्तु साक्षात् पदस्य सन्निवेशेऽपि ''नटस्य श्रुतम्'', ''मातुः स्मरति'' इत्यादि वाक्येषु साक्षात्क्रियाजनकता विद्यमानेऽपि

दोष: तदवस्थ:। शब्दरत्ने दोषस्य निराकरणोपाय: प्रदर्श्यते। तद्यथा ''नटस्य श्रुतम्'' इत्यत्र साक्षात् क्रियाजनकताया: विद्यमानात् कारकत्वात् नटस्य ''कारकाद्धत्तश्रुतयो:'' इत्यनेन अन्तोदात्त: प्राप्नोति। अत: अन्तोदात्तवारणार्थम् कारकाधिकारोक्तं षट्कमेव ग्रहणीयम्। तेन नटस्य इयं षष्ठी कारकाधिकारविषयभूता न भवति। अत: अन्तोदात्तप्राप्तिर्नभवति। एतश्च इत्थं लक्षणं निष्पन्नं - ''कारकाधिकारणपठितत्त्वे सति क्रियाजनकत्वं कारकत्वम् एवं लक्षणे कृते षष्ठीविभक्ते: व्यावृत्ति: स्वत: एव सिद्धयति। पुनश्च तद्व्यावृतये लक्षणे 'साक्षात्' पदस्य सन्निवेश: नापेक्षते। एवं लक्षणं प्रथमाविभक्तौ अपि घटिता भवति तस्या: कारकाधिकारे पठितत्वात् क्रियाजनकत्वाच्च। प्रथमाया: क्रियाजनकता-उपपादनं शेखरे कृतमस्ति।

तत्रयथा-आख्यातार्थकर्तु: क्रियायां साक्षात् अन्वय: भवति। पुनश्च प्रथमान्तार्थस्य आख्यातार्थेन सह अभेदसम्बन्ध: विद्यते। तेन आख्यातार्थे यथा क्रियाजकता विद्यते तथैव प्रथमान्तार्थेऽपि। उभयो: अभेदान्वयात्। अनेन प्रथमान्तार्थे कश्चित् दोष: नास्ति।

वस्तुतस्तु यदि ''साक्षात् क्रियाजनकत्वं कारकत्वम्'' इति लक्षणम् स्वीक्रियते तर्हि न कश्चित् दोष:। षष्ठ्यन्तस्य क्रियायां साक्षात् अन्वय: तत्रैव भवति यत्र स्वान्वययोग्यपदस्य समभिव्याहार: नास्ति। अत: ''ब्राह्मणस्य पुत्रं पन्थानं पृच्छति'' इति वाक्ये षष्ठ्यन्तस्य पृच्छति क्रियया सह अन्वय: भवितुं नार्हति, यतो हि क्रियान्वययोग्यता ''पुत्रे'' एव वर्तते। अत: कारकलक्षणस्य अतिव्याप्ति: अत्र न स्यात्। यत्र क्रियान्वययोग्य पदस्य समभिव्याहार: नास्ति यथा ''नटस्य श्रुतम्'' इत्यत्र 'नटस्य' इति पदं साक्षात् क्रियाया: जनकम्। तेन षष्ठी विभक्ते: अपि कारकलक्षणे अन्तर्भुता स्यात्। कारकाद्दत्तश्रुतयो:'' इत्यनेनाऽपि लन्तोदात्त: स्यात्''। अस्या: शंकाया: परिहारार्थं कथयति ''कारके'' इति सूत्रे कारकपदं स्वरितं भवति। अत: ''स्वरितेन अधिकार:'' इति सूत्रेण अस्य अधिकारत्वात् षट्कारकाणि एव गृह्यन्ते, न षष्ठी विभक्ति:। तेन ''नटस्य श्रुतम्'' इत्यत्र नास्ति कश्चित् दोष:। अधिकरणेकारके ''कटे आस्ते'' इयत्रापि आसन क्रियाया: स्ववृत्तिवृत्तित्वरूपसम्बन्धेन साक्षात् क्रियाजनकता अस्ति। तेन अधिकरणकारके कश्चित् दोष: नास्ति। अनेन नवीनानां आचार्याणां (नागेशानां) मतानुसारं ''क्रियाजनकत्वं कारकत्वं'' इति लक्षणं निष्पन्नम्।

**प्राचीनानां वैयाकरणानां मतम् -**

प्राचीनावैयाकरणा: कथयन्ति ''साक्षात् क्रियान्वयित्वं कारकत्वमिति'' तद्यथा- ''हरिं भजति'' इति वाक्ये कर्मत्वस्बन्धेन भज्धात्वर्थप्रितौ साक्षात् अन्वय: भवति। अत: हरिं इत्यस्य कारकत्वं वर्त्तते। हरिवृत्तिप्रीत्यनुकूलवर्तमानककाचिको व्यापार:'' इति वाक्यार्थ: भवति।

अधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयोन साक्षात्सम्बन्ध वर्तते। परन्तु नवीनानां मतानुसारं मतमिदं न समीचीनम्। ''कारके''सूत्रे शब्दरत्नकारा: कथयन्ति। ''यथा श्रुतं न युद्धम्। अयुक्तताया: हेतुत्वेन उच्यते उद्देश्यतावच्छेदकरूपेण उद्देश्यज्ञाने सत्येव किञ्चिद् विधीयते।'' अर्थात् ''उद्देश्यतावच्छेदकरूपेण यदा उद्देश्यं ज्ञातं स्यात् तदा तत्र अपूर्वविधानं भवति। यदि उद्देश्यतावच्छेदकस्य विधेये ऐक्यं स्यात् तदा विधेय: उद्देश्यतावच्छेदकत्वेन ज्ञात: स्यात्। अस्यां स्थितौ विधेयस्य अपूर्ववोधाभावात् विधेयत्वं न स्यात्। यथा - ''घटत्ववतां घटत्ववता'' अत्र

वाक्ये उद्देश्यटावच्छेदकं घटत्वं भवति पुनश्च घटत्वस्य एव विधानं भवति। अत: उद्देश्यतावच्छेदकस्य विधेयस्य च ऐक्यात् वाक्यस्य अर्थवोध: न स्यात्। अनेन एव प्रकारेण भगवान् पतञ्जलि: कारकाणां भावनान्वय: इति वाक्यस्य प्रयोगं कृतवान्। यदि क्रियान्वयित्वं कारकत्वं स्यात् तर्हि भाष्यवाक्यार्थ: स्यात् ''क्रियान्वयिनां क्रियान्वय:।'' येन उद्देश्यतावच्छेदकं क्रियान्वयित्वं तथा विधेयमपि क्रियान्वयित्वम्। अनयो: ऐक्यात् वाक्यस्य शाब्दवोध: न स्यात्। अत: क्रियान्वयित्वं कारकत्वं'' इति लक्षणं न समीचीनम्। कर्मकरणादि कारकेषु प्रधानीभूतक्रियोपयोगिनी या स्वावान्तरक्रिया तज्जनकत्वेन क्रियाजनकत्वरूपं कारकत्वम् उपपन्नम् भवति।

सर्वाणि-कारकाणि स्व-स्व-अवान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वे जनकरूपाणि भवन्ति। यदा यन्निष्ठव्यापारस्य स्वातन्त्र्येण विवक्षां करिष्याम: तदा तदाश्रय: कर्ता स्यात्। येन सर्वेषु कारकेषु ''करोति'' इति व्युत्पत्ति: समाहिता स्यात्। तद्यथा स्थालीनिष्ठे स्वस्मिन् समावेशनव्यापारस्य स्वातन्त्र्येण विवक्षाणां स्थालीकर्त्री भविष्यति, स्थाली पचतीति प्रयोग: स्यात्। इत्थमेव काष्ठनिष्ठव्यापारस्य स्वातन्त्र्येण विवक्षायां ''काष्ठानि पचन्ति'' इति प्रयोग: स्यात्। एवमेव कर्तुभिन्नकारकेषु अपि कर्तुत्वोपपादने जाते ''करोति'' इति भाष्यव्युत्पत्ति: संगच्छते। अथवा भगवान् भाष्यकार: ''यद्वा'' शब्दं प्रयुज्य पक्षान्तरम् उपस्थापितवान्। ''यद्वा कारकशब्द: क्रियापद: इति। अस्यार्थ भवति कारकशब्द: क्रियापरक:। कारकशब्दस्यार्थ: क्रिया'' कथं भवित् मर्हति ? ''करोति'' इति व्युत्पत्तिरपि कथं ? इति प्रश्नस्य समाधानं स्वयं प्रश्नमाध्यमेन करोति। ''करोति'' इति प्रयुज्य प्रश्नं करोति किं करोति ? तत: उत्तरं प्रददाति कर्त्तृत्वकर्मत्वव्यपदेशम् करोति। तदेव कारकत्वेन अभिधीयते। कर्तृत्व-कर्मत्वादीनां व्यपदेशस्य हेतु: क्रिया। अत: कारकस्य अर्थ: क्रिया भवति। एवमेव ''कारके'' इत्यस्य अर्थ: क्रियायाम्। सप्तम्या: अर्थ: विषयता। या जनकतारूपा। अर्थात् क क्रियाजनकतावतां अपादानादि-संज्ञा भवति। अस्मिन् पक्षे, विभक्तिव्यव्यासस्य आवश्यकतानास्ति।

काशिकाकारा: कारकशब्दं निमित्तपरकं स्वीकृत्य ते कथयन्ति - कारकशब्द: निमित्तपर:। निमित्तस्य तात्पर्य्यं हेतु:। कस्य निमित्तम् इति जिज्ञासायाम् उच्यते - 'क्रियानिमित्तं कारकम्। इति लक्षणं सम्पद्यते। तद्यथा- ग्रामात् आगच्छति। अत्र आगमनक्रियाया: हेतु: श्रम:। अत: ''श्रमात्'' इति कारकम्। यदि ग्राम: अवधिभूत: न स्यात् तर्हि आगमन-क्रियाया: निष्पत्ति: न स्यात्। तेन ''वृक्षस्य पर्णं पतति'' अत्र ''वृक्ष: पर्णस्य सम्बन्धीतया विवक्षित: न निमित्ततया। अत: वृक्षस्य कारकत्वं नास्ति।

काशिकाशेखरय्यो: मतं न भिन्नं भवति। शेखरकार: जनकतां कारणतारूपेण स्वीकुर्वन्ति। केवलं शब्दप्रयोगे भिन्नता अत्र दृश्यते। इति शम्।

**विवक्षात: कारकाणि भवन्ति -**

येषां व्यापाराणां भेदेन कारकाणि भिधन्त स: भेद: विवक्षाधीन: भवति तात्त्विक: न भवति। अर्थात् यस्य व्यापारस्य येन प्रकारेण विवक्षा क्रियते तत् तदनुरूपं कारकं भवति। अत: व्याकरण सम्प्रदाये ''विवक्षात: कारकाणि भवन्ति'' इति न्याय: प्रचलति। तद्यथा वयं वक्तुं शक्नुम: यत् यदा यस्य व्यापारस्य विवक्षा सर्वथा स्वतन्त्ररूपेण क्रियते तदा तत् कर्तृकारकं भवति। वस्तुस्थित्या तत् कर्म-करणम्-अधिकरणं वा भवितुं अर्हति।

अनया दृष्ट्या अस्माभि: तत्त्वत: ''स्थाल्यां पचति'' इति उक्त्वा स्थाल्या: अधिकरणरूपं प्रदर्श्यते। परन्तु पाकक्रियां स्थाल्या संपुज्य ''स्थली पचति'' अपि प्रयोक्तुं शक्यते। अनेन प्रकारेण ''अग्निना पचति'' इति स्थाने ''अग्नि: पचति'' इति वक्तुं शक्यते। तथैव अन्येषु कारकेषु अपि परिवर्तयितुं शक्यते। यथा शृङ्गात् शरो जायते, अथवा शृङ्गं शरो जायते।'

यदा करणादीनां कर्तृरूपेण विवक्षा क्रियते तदा केनरूपेण भवन्ति ''अस्योदाहरणं विस्तृतरूपेण भगवता पतञ्जलिना महाभाष्ये प्रदत्तम्। तद्यथा - द्रोणं पचति, ओदकं पचति, इति सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीति उच्यते। तदा तत्र पचिवर्त्तते। एषोऽधिकरणस्य पाक: एतदधिकरणस्य कर्तृत्वम्। एधा पक्षन्त्या विक्रिलतोज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति, काष्ठानि पचन्ति इत्युच्यते। तदा तत्र पचि वर्त्तते। एष: करणस्य पाक:, एष: करणस्य कर्तृत्वम् ।(१-४-२३)

एतदपि अत्र अवधेयम् यदा विवक्षाभेदेन अपादानाधिकरणकर्तृकरणादीनां नानात्त्वेन प्रयोग: भवति तदा वाक्यानां व्याख्यानमपि भिन्नत्त्वेन क्रियते। अर्थात् अपादानकारकस्य विद्यमाने या व्याख्या भवति सा व्याख्या अपादानकारकस्य स्थाने प्रयुक्तस्य अधिकरणकारकस्य भविष्यति। अत्र भाष्यकैटयो: मतम् उपस्थाप्यते-

भाष्ये उक्तम् तयो: स्यातन्त्र्यपारतन्त्रयो: पर्यायेण वचनं भविष्यति। तद्यथा वलाहकात्-विद्योतते विद्युत्, वलाहके विधीतते, वलाहको विधीतते (१-४-२३)। अत्र एकस्मिन् अर्थे अपादानस्य अधिकरणस्य, कर्त्तुरपि प्रयोग: भवति। परन्तु कारकाणां भिन्नत्वात् क्रियाया: व्याख्याने भिन्नता भविष्यति। अपादान पक्षे व्याख्या भवति- नि:सरणाङ्गे विद्योतेन द्युतवर्त्तते पृथक भावश्च विवक्षित: इति अपादानत्त्वम्। अधिकरणपक्षे व्याख्या भवति। स्थित्यङ्गे द्योतनेऽत्र द्युति: वर्त्तते। वलाहके स्थित्वा ज्योतिरूपा विद्युत् विद्यतते इत्यर्थ:।

कर्तृपक्षे अर्थ: भवति - विद्युतो वलाहकस्य च अभेद विवक्षायाम् अयं प्रयोग: इति ''कारके'' सूत्रे केयट:। एतेभेदा: विवक्षानुसारं भवन्ति। यद्यपिवस्तुस्थिति: सर्वत्र समाना ''वस्तुत: एक एव अर्थ आत्मा'' ''कारके'' सूत्रे कैयट:। इति हेतो: विवक्षात: कारकाणि भवन्ति इति सिद्धान्त: सफलं प्रतिपादित:। ''इति शम्''

**प्राध्यापक: व्याकरणविभागे:**

**समाधीन संस्कृतमहाविद्यालय:**

# एकः पूर्वपरयोः(६-१-८४)इत्यधिकारसूत्रोपवृंहणम्

## (The connotation of A Governing Rule Eka PURVAPARAYO)

*डॉ. सुबलचन्द्रसाहुः*

**उपज्ञा(Prologue)**- अर्थविषयकबोधजनकत्वावच्छिन्नपरिनिष्ठितपदस्वरूपाभ्युपगमाय दृक्पथारुढेषु व्याकरणव्याचक्षाणै र्भाष्यकृद्भिश्च कल्पितेषु षड्विधसूत्रेषु अधिकारसूत्राणामन्वाख्यापत्वं प्रतिपद्यामहे । तत्र अधिकारसूत्रस्योपचायकत्वेन स्वरितेनाधिकारः (१.३.११)सूत्रमुपजीव्य शास्त्रकृता स्वरिताक्षरविशिष्टं शब्दस्वरूपमधिकारत्वेन व्यापृतिं लभते इति प्रोक्तम् । आनुनासिक्यवदत्र स्वरितोच्चारणमपि प्रतिज्ञागम्यम् । व्याडिकृतपरिभाषा अस्य प्रामाण्यमावहति , यथा प्रतिज्ञास्वरिताः पाणिनीयाः[१] । तथाहि वक्ष्यमाणसूत्रेषु पाणिनिना स्वरिताः प्रतिज्ञाताः दृश्यन्ते । यथा- प्रत्ययः[२] धातोः[३] , अङ्गस्य[४], भस्य[५], पदस्य[६] प्रभृतिषु । काशिकातवृत्तौ[७] समाम्नातम्- अधिकारः विनियोगः स्वरितगुणयुक्तं शब्दस्वरूपमधिकृतत्वादुत्तरोपतिष्ठते । अत्र स्वरितेन इति इत्थम्भूतलक्षणे[८] इत्यनेन तृतीया । स्वरितो नाम स्वविशेषो वर्णधर्मः । तेन चिह्नेनाधिकारो वेदितव्यः । न्यासकारेण तु अधिकारे क्रियमाणे तदवगमोपायदर्शनाय स्वरितेनाधिकार इत्येतदपि कर्त्तव्य इत्युक्तम् । पदमञ्जर्यां[९] हरदत्तेन आकाङ्क्षारहितेऽपि वाक्ये प्रकृतस्य सम्बन्धार्थः शास्त्रीयार्थः । यथा- दूरान्तिकार्थेभ्यो द्वितीया च[१०] इत्यत्र पञ्चम्यधिकार इति ।

**अधिकारस्य फलाशंसा(Consequence of the Governing Rule)** – महाभाष्ये स्वरितेनाधिकार[११] इति सूत्रेऽधिकारस्य फलत्रयमुपन्यस्तम् । प्रथमम्- स्वरितेन अधिकारगतिः यथा विज्ञायेत तत्र उदाहरणम्- गोस्त्रियोरुपसर्जनस्य[१२] अत्र स्त्रीग्रहणं स्वरयिष्यते । द्वितीयाफलम्- अधिकं कार्यं - अपदानम् आचार्यः किं न्याय्यं मन्यते । यत्र प्राप्य निवृत्तिः । तेनेहैव स्यात् ग्रामादागच्छति नगरादागच्छति ।सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात् । तृतीयफलम् – अधिकः कारः पूर्वविप्रतिषेधाश्च न पठितव्याः भवन्ति । गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धम् , नुमचिरतृज्वद्भावेभ्यो नुट्, मुम्नुटौ स्वरयिष्यते । तत्र स्वरितेनाधिकः कारो भवतीति नुम्नुटौ भविष्यतः ।

एकः पूर्वपरयोः (६-१-८४) अधिकारसूत्रमिदम् । अधिकारशब्दः भावसाधनः तस्मात् अधिक्रियते अनेन इति भावे इत्यनेन घञ्प्रत्यये अधिकारशब्दः निष्पन्नः । एकः पूर्वपरयोः इति सूत्रादुत्तरं पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीति अवधातव्यम् । उदाहरणम्- आद् गुणः(६.१.८७)इति अनेन उपेन्द्रः, रमेश इत्यादिषु अवर्णात् अचि परे पूर्वपरयोरेको गुणादेशः संहितायां भवति इत्यर्थः ।

**पूर्वपरस्तथा एकग्रहणस्य प्रतिचक्षणम्(Appraisal of the Sutra)**

याथार्थ्यसम्बन्धे काशिकाकारः[१३], ब्रवीति – पूर्वपरग्रहणम् द्वयोरपि युगपगदादेशप्रतिपत्यर्थम् ।

अन्यथा एकस्यैव हि स्यात् । नोभे सप्तमीपञ्चम्यौ युगपत् प्रकल्पते भवत: । अर्थात् एकस्मिन् समये सप्तमी पञ्चमी स्थाने कस्यापि आदेशस्य कल्पनमसाम्प्रतं तस्मात् पूर्वपरयोरादेश: युगपत् बोध्यम् ।

**एकग्रहणं पृथगादेशनिवृत्यर्थम्(The word Eka refutes other substitutes)** स्थानिभेदात् हि भिन्नादिषु नत्ववत् द्वौ आदेशौ स्याताम् । पृथगादेशनिवृत्यर्थम् एकग्रहणं सार्थकमिति काशिकाया: तात्पर्यम्, अर्थात् पूर्वपरयो: निर्देशात् स्थानीभेद: दृश्यते । (उपेन्द्र: अ इ स्थानीद्वयम्), स्थानिद्वये अनेकादेश: प्रसज्येत । यता भिन्नमित्यत्र रदाभ्यां निष्ठातो न: पूर्वस्य च द:[१४] इति सूत्रेण रदकाराभ्यां परस्य निष्ठा तस्य न तथा निष्ठापूर्वं विद्यमानदस्य च न , तस्मात् भिद् क्त भिन् न भिन्न इति सिध्यति । अत्र द् त् इति स्थानिद्वयस्य न न इति आदेशद्वयं दृश्यते । एतादृश अनेकादेशवारणाय एकग्रहणं सार्थकम् । भाष्ये[१५] – न वा द्रव्यवत् कर्मचोदनायां द्वयोरेकस्याभिनिवृत्ते: इति वार्त्तिकपुरस्सरमुच्यते एकग्रहणमप्रयोजनम् । अत्र कर्मशब्द: कारकपर: न तु क्रिया पर उच्यते लोके अनयो: पूलयो: कटं कुरु । अनयो: मृत्पिण्डयो: घटं कुरु । अत्र एकग्रहणं विनाऽपि एकस्य कटस्य एकस्य घटस्य निष्पादनम् ।

**भाष्ये एकग्रहणं प्रत्याख्यानम्(Eka is forbidden in Bhasya)** भ्रस्जोरोपधयोरमन्यतरस्याम्[१६] इत्यनेन भ्रस्ज्धातो: लिटि तसोऽतुसि रेफसकारयो: स्थाने रम् आगमे मित्वादकारात् परे च कृते भर्ज अतुस् इति द्वित्वे अभ्यासादिकार्ये वभर्जतु: सिध्यति, अत्र एकग्रहणं विनाऽपि कार्यं सम्भवति । यदि कथ्यते रदाभ्यां निष्ठातो न: अत्र द्वयो: स्थानिनो: द्वौ आदेशौ भवत: , तदपि न युक्तम् । यत: योगविभाग: करिष्यते रदाभ्यां निष्ठातो न: तत: पूर्वस्य च द: अत्र योगविभागवलात् एकैकस्य स्थानिन: एकैकादेशो प्रवर्तते । वार्त्तिकान्तरं[१७] यथा सिद्धं तु धर्मोपदेशनेऽनवयवविज्ञानात् यथा लौकिकवैदिकेषु इति वार्त्तिकवलात् लोके ब्राह्मणो न हन्तव्य: , सुरा न पेया । अत्र ब्राह्मणमात्रं न हन्यते, सुरामात्रं न पीयते । यदि अवयवेन शास्त्रार्थसंप्रत्यय स्यात् तर्हि एकं च ब्राह्मणं हत्वा एकां च सुरामपीत्वा अन्यत्र कामचार: स्यात् । तथा वेदे खल्वपि वसन्ते ब्राह्मणो अग्निष्टोमादिभि: ऋत्वभिर्यजेत इति , अग्न्याधाननिमित्तं वसन्ते वसन्ते इज्यते । यदि चावयवेन शास्त्रार्थसंप्रत्यय: स्यात् सकृत् इष्टा पुनरिज्यायां न प्रवर्त्तते । एक: पूर्वपरयो: इति अधिकारसूत्रस्य दशविधप्रवर्तनम् ।

१ .अन्तादिवच्च,[१८] प्रातिपदिक-अप्रातिपदिकयोरेकादेश:
२ .असिद्ध एकादेश:
३ .गुणैकादेश:
४ .वृद्धिरेकादेश:
५ .आ एकादेश:
६ .पररूपमेकादेश:
७ .वैकल्पिकपररूपमेकादेश:

८.पूर्वसवर्णदीर्घैकादेश:
९.पूर्वरूपमेकादेश:
१०.उकारैकादेश:

एक: पूर्वपरयोरित्यधिकारसूत्रस्य सप्तविंशतिसूत्रेषु संभूति:**(Appositeness of Rule in Subsequent 27 sustras)**

१.अन्तादिवच्च- प्रातिपदिकाऽप्रातिपदिकयोरेकादेश: ।
अर्थ: - योऽयमेकादेश: विधीयते स: पूर्वस्यान्तवत् परस्यादिवत् भवति । उदाहरणम्- ब्रह्मवन्धू उञ् ब्रह्मवन्धू अत्र ब्रह्मवन्धू प्रातिपदिकस्थस्य उकारेण सह अप्रातिपदिक उकारस्य एकादेशे ब्रह्मवन्धू शब्दात् सुबुत्पत्ति: न जायेत ।

२.षत्वतुकोरसिद्ध:[१९]- असिद्धैकादेश:
अर्थ: - षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्ध: भवति ।
उदाहरणम्- षत्वविधौ – को असिचत् कोऽसिचत् ।

अत्र एङ: पदान्तादति इत्यनेन पूर्वपरयोरेकादेशो जायते । इण: ष: सूत्रेण षत्वे प्राप्ते सकारस्य पदादित्वाभावात् सात्पदाद्यो: इति सूत्रेण षत्वस्यासम्भवात् केवलमेकादेशस्य असिद्धत्वात् इण: दुर्लभात् षत्वं न जायते । तुक्[२०] विधौ अधीत्य अधि इ य , अत्र उपसर्गस्थ इकारेण सह धत्वन्तर्गत इकारस्य एकादेशे अधी जाते दीर्घैकादेशस्य असिद्धत्वात् ह्रस्वस्य पिति कृति तुक् तेन अधीत्य सिद्धम् ।

३.आद्गुण:[२१]- गुणैकादेश:
अर्थ:- अवर्णादचिपरे पूर्वपरयो: एक: गुणादेश: । उदाहरणम्- रमेश: , उपेन्द्र: , गङ्गोदकम् ।
४.वृद्धिरेचि[२२]- आदेचि परे वृद्धिरेकादेश: स्यात् । यथा देवैश्वर्यम् ।
५.एत्येधत्यूठ्सु[२३]- अवर्णादेजाद्योरेत्येधत्योरुठि च परे वृद्धिरेकादेश: । यथा – उपैति, उपैधते ।
६.आटश्च[२४]- आट: परो योऽच् , अचि च पूर्वो य आट् तयो: पूर्वपरयोराडचो: स्थाने वृद्धिरेकादेश: । यथा – ऐक्षत- ईक्ष दर्शने – आ ईक्ष अत्र आ ईकारयो: वृद्धिविधाने ऐक्षत ।
७.उपसर्गादृति धातौ[२५]- अवर्णादुपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेश: । यथा- उपार्च्छति ।
८.उपसर्गादृति धातौ[२६]- अवर्णान्तादुपसर्गाद् ऋकारादौ सुप्धातौ परे वृद्धिरेकादेश: वा स्यात् ।
९.औतोऽम्शसो:[२७]- अर्थ:- ओतो अमि शसि च परे पूर्वपरयोरेकादेश: भवति ।
उदाहरणम्- गो अम् ओ अ आ, गां पश्य ।
गो शस् ओ अ आ , गा: पश्य ।
१०.एङि पररूपम्[२८]-अवर्णान्तापसर्गादेङादौ धातौ परे पररूपमेकादेश: । उदाहरणम्- प्र एजते प्रेजते, उप ओषति उपोषति ।
११.ओमाङोश्च[२९]- पररूपमेकादेश:

अर्थः – ओमि आङि च आत् परे पररूपमेकादेशः । उदाहरणम्- शिवाय ओम् नमः , शिवायो नमः, शिव एहि शिवेहि ।

१२.उस्यपदान्तात्[३०]- अवर्णान्तादुसि पूर्वपरयोराद् गुणापवादः पररूपमेकादेशो भवति । उदाहरणम्- भिन्द्या उस् भिन्द्युः

१३.अतो गुणे[३१]- अकारान्तादपदान्ताद् गुणे परतः पूर्वपरयोः स्थाने पररूपमेकादेशः । उदाहरणम्- पच् शप् लट् झि(अन्ति) पचन्ति ।

१४.अव्यक्तानुकरणस्यात इतौ[३२] – अव्यक्तानुकरणान्तर्गत – अत शब्दादितौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः । यथा पटत् इति पटिति । घटत् इति घटिति ।

१५.नाम्रेडितस्यान्त्यस्य तु वा[३३] – अव्यक्तानुकरणस्याम्रेडितस्य च वैकल्पिकपररूपमेकादेशः स्यात् । उदाहरणम्- पटत्पटदिति ।

१६.नित्यमाम्रेडिते डाचि[३४]- डाच् परं यदाम्रेडितं तस्मिन् पूर्वस्य अव्यक्तानुकरणस्यात् शब्दस्य योऽन्त्यस्तकारस्तस्य पूर्वस्य परस्य चाद्यस्य वपर्णस्य नित्यं पररूपमेकादेशः ।

१७.अकः सवर्णे दीर्घः[३५]- अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात् । उदाहरणम्- मुनि इन्द्रः मुनीन्द्रः ।

१८.प्रथमयोः पूर्वसवर्णः[३६] – प्रथमायां द्वितीयायां च विभक्तौ अचि अकः पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घैकादेशः । यथा – अग्नी अग्नी औ ।

१९.तस्माच्छसो नः पुंसि[३७]- पूर्वसवर्णदीर्घादुत्तरस्य शसो अवयवस्य सकारस्य पुंसि सस्य नादेशः । यथा वायून् ।

२०.नादिचि[३८]- अवरअणादिचि पूर्वसवर्णदीर्घो न भवति , वृक्षौ ।

२१.दीर्घाज्जसि[३९]- पूर्वसवर्णदीर्घैकादेशनिषे):, यथा कुमार्यः ।

२२.अमि पूर्वः[४०] – पूर्वरूपमेकादेशः स्यात् । यथा वृक्षम्, फलम् ।

२३.वा छन्दसि [४१]– वैकल्पिकपूर्वसवर्णदीर्घैकादेशःस्यात् ।

अर्थः – छन्दसि वेदे वा दीर्घात् जसि इचि च परतः वा पूर्वसवरअणदीर्घो न भवति । उदाहरणम्- मारुतीश्चतस्त्रः, मरुत् देवता आसाम , साऽस्य देवता, अणि आदि वृद्धौ अपि मारुती जस्(अस्)विकल्पे पूर्वसवर्णदीर्घे सस्य विसर्गे मारुतीः, पक्ष यणादेशे मारुत्यश्चतस्त्रः ।

२४.सम्प्रसारणाच्च[४२]- संप्रसारणादचि परतः पूर्वपरयोः पूर्वरूपमेकादेशः स्यात् ।

अर्थः – सम्प्रसारणादचि परे पूर्वरूपमेकादेशो भवति ।

उदाहरणम्- इष्टम्- यज् क्त - यसम्प्रसारणे इ अस्य पूर्वरूपे इ व्रश्चभ्रस्ज इति सूत्रेण जस्य षत्वे ष्टुत्वे च इष्टम् सिद्धम् ।

२५.एङः पदान्तादति [४३]– पूर्वरूपमेकादेशः

अर्थः- हरेऽव, विष्णोऽव ।

२६.ङसिङसोश्च [४४]– पूर्वरूपमेकादेश:
अर्थ:- एङ: परयो: ङसिङसोरति परत: पूर्वपरयो: स्थाने पूर्वरूपमेकादेश: भवति ।
२७.ऋत उत्[४५]- उकारैकादेश: , अर्थ:- ऋकारान्तात् परयो: ङसिङसोरति परत: पूर्वपरयो: रुकार एकादेश: । उदाहरणम्- पितुरागच्छति, होतुरागच्छति । पितृ ङसि(अस्), अत्र ऋ अ स्थाने उकारे एकादेशे रपरत्वे पितुरागच्छति सिद्धम् इति ।

**सूत्रसन्नद्धाद्वैतप्रतिपत्ति:(Monism inherent in Aphorism)**

एक: पूर्वपरयो: सूत्रे अद्वैतवादप्रतिष्ठा च प्रकामं ध्वनति । पूर्वापरप्रथमचरम....[४६]इति सूत्रे सर्ववेदपारिषदं हीदं शास्त्रम् इति भाष्यवचनात् सूत्रात्मकं शब्दब्रह्म अद्वैतवादस्य प्रत्यायकं मन्यते । नागेशभट्टेन शब्देन्दुशेखरे[४७] सोऽयमक्षरसमाम्नाय: पुष्पित: फलितश्चन्द्रतारकवत् प्रतिमण्डित: ब्रह्मराशि: ।थ अत्र शब्दसमाम्नाय एव ब्रह्मराशित्वेन प्रकल्पितम् । महाभाष्ये[४८] – मङ्गलादीनि हि शाल्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति । आयुष्मत्त् पुरुषाणि चाध्येतारश्च सिद्धार्था यता स्युरिति इति उपन्यस्तम् । सुरेन्द्रनाथदासगुप्तामहोदयेन तदेव प्रपञ्चितम् [४९] । **The Shastras that begin with auspicious words are traditionally continued and invest(their readers) with heroism and are associated with long life and so that those who read (such Shatras) attain their fruit.**

मन्मते परशब्दयो: स्फोटध्वनिरूपेण शास्त्रे व्याकरणदर्शने व्यपदेश: विधीयते । ध्वन्यात्मकं स्फोटात्मकमिति शब्दस्य स्वरूपद्वयं लक्ष्यते । श्रोत्रेन्द्रियग्राह्य: ध्वनिरूपस्तु शब्दपदेन व्यवह्रियते । स्फोटात्मकस्तु नित्यश्चेतन एव, तथाहि तैत्तिरीयोपनिषदि, अध्यात्मसंहितासन्दर्भे ध्वनिरुपशब्दनिर्गमने पूर्वपरसन्धानं नाम संयोगस्तु समाश्रित: यथा – अथाद्यात्मम्, अधरा हनु: पूर्वरूपम्, उत्तरा हनुरुत्तररूपम् । वाक् सन्धि: जिह्वा सन्धानम् । वृहदारण्यकोपनिषदि[५०]- वाग्वै ब्रह्म इति वचनेन नित्याया: पराख्यवाच: उपासनया परमपदं लभ्यते । समासे च एकार्थीभावसामर्थ्यं शाब्दबोधसौकर्याय समाश्रीयते । आर्यभाषासु पदानामेकीकरणव्यवस्था पदार्थबोधाय यथार्था इति मेक्समोलारमहोदयेन प्रकटिता । यथा-[५१] **The power of forming two or more words into one, which belongs to all Aryan languages, has been so largely developed in Sanskrit.** जगन्नाथवेदालङ्कारमहोदयेन वेद: शब्दब्रह्मण: स्वरूपमिति निगदितम्, यथा-**The Veda – the word form of Braham. The Indian or father the Aryan mind is saturated with the idea that the Veda is Sabdabrahma.** शब्दब्रह्म **i.e, the word form of Braham and therefore as vast and infinite as Brahman itself.**[53]

उपसंहृत्ति:-**(Dpilogue)**

महामुनिपाणिनिप्रणीतवेदाङ्गभूतव्याकरणं परमपुरुषार्थभूतं मोक्षलक्षणमिति स्फुटं संकीर्तितम् । भाष्यकृता[५४] ब्राह्मणेन निष्कारण: षडङ्गो वेदोऽध्येय: ज्ञेयश्च इत्यागमे षडङ्गपदेन व्याकरणं सङ्केतितम् । गोपथब्राह्मणे[५५] षडङ्गो वेदस्तत्तथा धीमहे इत्युक्तौ तच्च विनिर्दिष्टम् । बृहदारण्यकोपनिषदि[५६] आत्मा वारेऽद्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यात्मसाक्षात्कारलक्षणं मोक्षमपरिहार्यमिति प्रोक्तम् । शुक्लयजुर्वेदे[५७] - दृष्ट्वारूपे व्याकरोत् सत्यानृते प्रजापत्ति: , अश्रद्धामनृते दद्यात् श्रद्धां सत्ये प्रजापत्ति: ।

अत्र परारूपं वाक्ब्रह्म परमार्थभूतं ब्रह्मात्मैकयोबोधप्रतिपादकमिति निगूढं तात्पर्यम् , वाक्यपदीये तद् व्याकरणागम्य परंब्रह्माधिगम्यते[५८] इति वचनप्रामाण्यादपि प्रोक्तसूत्रे एकत्वरूपमद्वैतचिन्तनमनुचीयते । शब्दस्य परंब्रह्मत्वकथनेन चिद्रूपता आनन्दरूपता चावभासते । स एव शब्द: प्रपञ्चात्मकविवर्तोपादानस्वरूप: स्फोटाभिधेय:, पदार्थस्तु नाद्रव्यादिरूप:, गुणक्रियादिशून्यत्वात्, अपि तु भावात्मैक केवलं वक्तुं कथञ्चित् शक्यते इति श्रीभट्टोजिदीक्षितेन शब्दकौस्तुभे[५९] प्रत्यपादि । ब्रह्मसूत्रशाङ्करभाष्ये दृष्टस्य वर्णानामर्थबोधकत्वस्य हानि:, अदृष्टस्य स्फोटस्य कल्पनेति गौरवं ना सोढव्यम्[६०] । ब्रह्मभिन्नस्फोटरूपशब्दोऽत्र एकगम्य: गृह्यते , तथाहि भाष्यं विवृणवता उद्योतकृता प्रोक्तम्[६१] – एकगम्य: वाक् विषय: अत्र ज्ञानेनैव निर्विकल्पज्ञानेनैवेत्यर्थ: । महर्षिपतञ्जलिना[६२] तु एक इन्द्रोऽनेकस्मिन् क्रतुशते आहूत इति च प्रादुर्भूत इत्यर्थकमिति धिया बहुत्वे एकत्वमेव सिद्धान्तितम् ।

**सन्दर्भसमाहृति:(Complitation of references)**


१.व्या.प(व्याडिकृतपरिभाषा)-व्या.प.१२२
२.पा.सू-१.१.१
३. पा.सू-३.१.९१
४. पा.सू-६.१.१
५. पा.सू-६.१.१२९
६. पा.सू-८.१.१६
७. पा.सू-६.१.८४
८. पा.सू-२.३.२१
९. पा.सू-पदमञ्जरीकाव्यवृत्ति:
१०. पा.सू-२.३.३४
११. म.हा-१.३.११
१२. पा.सू-१.२.४८
१३. पा.सू-६.४.६.१.८४
१४. पा.सू-८.२.४२
१५. पा.सू-६.१.८४
१६. पा.सू-६.१.४७
१७. पा.सू-६.१.८४
१८. पा.सू-६.१.८४
१९. पा.सू-६.४.८६
२०. पा.सू-६.४.७१
२१. पा.सू-६.४.८७
२२. पा.सू-६.१.८८
२३. पा.सू-६.१.८९
२४. पा.सू-६.१.९०

२५. पा.सू-६.१.९१
२६. पा.सू-६.१.९२
२७. पा.सू-६.१.९३
२८. पा.सू-६.१.९४
२९. पा.सू-६.१.९५
३०. पा.सू-६.१.९६
३१. पा.सू-६.१.९७
३२. पा.सू-६.१.९८
३३. पा.सू-६.१.९९
३४. पा.सू-६.१.१००
३५. पा.सू-६.१.१०१
३६. पा.सू-६.१.१०२
३७. पा.सू-६.१.१०३
३८. पा.सू-६.१.१०४
३९. पा.सू-६.१.१०५
४०. पा.सू-६.१.१०६
४१. पा.सू-६.१.१०७
४२. पा.सू-६.१.१०८
४३. पा.सू-६.१.१०९
४४. पा.सू-६.१.१०९
४५. पा.सू-६.१.११०
४६. पा.सू-६.१.१११
४७. ल.श.संज्ञाप्रकरणम्
४८. म.हा.पस्पसाह्निकरम्
४९.महाभाष्यपतञ्जलि:(सुरेन्द्रदाशगुप्ता)
५०. तै.उ.शिक्षावल्ली
५१. वृह.आ.उप-४.१.२
५२. संस्कृतव्याकरणम्(म्याक्समुलार)
५३. ज्योतिषां ज्योति:
५४. पा.सू-६.१.जगन्नाथो वेदालंकार:
५५. पा.सू-६.१.म.भा.पस्प-१.१
५६. वृह.आ.उप-२.४.५
५७. शुक्लयजु:-१९.१७
५८. वा.प-१.२२
५९. श.कौ.म.भा.पस्प.पृ-१४
६०. ब्र.सू.शा.भा-१.१.१
६१. म.हा.प्र.उ-१.१.१
६२. म.भा.१.२.६४

*अध्यापक: (व्याकरणविभाग:)*
*सरकारीसंस्कृतमहाविद्यालय:,*
*वारिपदा, ओडिशा, दूरवाणी-*
*९५५६८१११३३*

# पाणिनीयाधिकारसूत्राणां संघटनकौशलम्

*डॉ. सुरजित् सामन्तः*

सूत्रात्मकं पाणिनीयं व्याकरणं सर्वातिशयी इति प्रतिवचनं नापेक्षितम् कुत्रचित् । तदीयं व्याकरणं अन्वर्थसंज्ञकतया अष्टाध्यायी इति नाम्ना विदितवृत्तान्तम् । सूत्राणां संख्या आकलनेन मतवैचित्र्येण विभिन्नता विभति । तथापि चतुर्सहस्रसूत्राणां पञ्चसूत्रविवर्जित इति वचनानुसारेण अष्टाध्यायां सूत्रसंख्या ३९९५ इति वर्त्तते । संज्ञापरिभाषा – विधि – नियम – अतिदेश – अधिकारः इति भावेन षड्विधम् ।

अष्टाध्यायां पञ्चसप्ततिसंख्यकानि (७५) अधिकारसूत्राणि सन्ति । अधिकं करोति इति अधिकार इति व्युत्पत्त्या अधिकारसूत्रे प्रयोगाणामवधीयते । प्रथमा पञ्चमी षष्ठी सप्तमीविभक्त्यन्तपदानां निर्देशो जायते । कुत्र सावधिकनिर्देश कुत्र च निरवधिकनिर्देश इति उभयता प्राप्यते । सूत्रेषु जडवत् अवतिष्ठते इति सर्वमधिकारसूत्र-विचारसन्दर्भे अत्र प्रतिपादयिष्यते ।

सूत्रसञ्चरणविधौ अधिकारसूत्रसंघटनप्रकारः विविधरहस्यं तनुते वैज्ञानिकरीत्या पाणिनिना पुरस्कृतः इति व्याख्यानात् प्रतीतिः जायते । विधिसूत्रैकवाक्यतया बोधजनकत्वमाधिकारत्वम् । अथवा स्वदेशे वाक्यार्थबोधकमुत्तरोत्तरसूत्रेषु संघटकपदसमर्पकमधिकारसूत्रम् । अनेन विधिसूत्राणां संज्ञासूत्राणां चावधिः निर्देश्यते। प्रथमाध्यायादारभ्य अष्टमाध्यायं यावत् प्रायशः पञ्चसप्तत्यधिकारसूत्राणि आकलितानि। तत्रापि गुरुभूताधिकारदेशे लघुभूताधिकारसूत्राणि प्रथितानि वर्त्तन्ते । द्विविधः उपन्यासः अत्रदृश्यते । सावधिकनिर्देशः निरवधिकनिर्देशचेति । सावधिकनिर्देशे प्राङ्-आङ् वचननिर्देशः जायते ।

**अधिकारसूत्रेषु विभक्तिः** – अधिकारसूत्रेषु विभक्तिनामुपपादनं विभिन्नतया उपजायते, प्रथमा-पञ्चमी-षष्ठी-सप्तमी-विभक्तिनामुपयोगः पाणिनीयमुद्देश्यं सार्थकं करोति । प्रथमाविभक्त्यन्तत्वेन चत्वारिंशत् सूत्राणि – आकडारादेका संज्ञा (१-४-१), अव्ययीभावः (२-१-५) इत्यादीनि । अत्र विधौ इदमेव लक्षीक्रियते यत् यत्र संज्ञाधिकारः क्रियते, कस्यचित् संज्ञायाः प्रतिपादनमुपपादयितुम् इष्यते, तत्र प्रथमविभक्तिः विधीयते । पाणिनीय- सूत्रसंघटनशैली सर्वथा एकार्थतात्पर्यबोधकं पदमुपतिष्ठते अस्ति कस्मिंश्चिद् विशिष्टे उद्देश्ये ।

अधिकारसूत्रं जडवदुपतिष्ठत इति विचारादेषु सूत्रेषु प्रथमाविभक्त्यन्तं नाभिलषितं स्याच्चेत् अनर्थकतापत्तिः, पुनश्च विभक्तिविपरिणामेन गौरवापत्तिश्च जायते ।

**अधिकारसूत्रेषुपञ्चमीविभक्ति: –**

पञ्चमीविभक्त्यन्तपदेन अधिकारसूत्राणां संख्या एकोनविंशति: । तत्र प्राक्पदसहितेन प्राक्पदरहितेन च पञ्चमी इति भावेन विभागऽयं लक्ष्यते । अष्टौ सूत्राणि एकपदसहितेन एकादशसूत्राणि तद्रहितेन उपनिवद्धानि । तत्रापि प्राकपदाभावपञ्चम्यन्तसूत्रेषु विभागऽयं लक्षीकृतम्, केवलं पञ्चम्यन्तपदधिकार:, पञ्चमीविभक्त्यन्तं पदम् + तदितरविभक्त्यन्तं पदम् इति एवं विधेषु अधिकारसूत्रेषु द्वौ प्रकारौ सावधिकानिर्द्देशा: निरवधिकनिर्द्देशश्चेतिभावेन । यत्र प्राक्पदमनस्युतं तत्र तत् पदयोगेन पञ्चामीविभक्ति: पाणिनीयसूत्रेण अन्याराादितरर्ते-दिक्छब्दाञ्चत्तरपदाजाहियुक्ते ....... २/३/२९ इत्यादिना साध्यते । तत: परभुतं सूत्रमादाय सूत्रोपान्तं पदमेकमादाय वा पञ्चमी विभक्त्या विधानेन प्राक्पदं संयुज्यत सति तात्पर्य्यम् । तथाहि – प्रागीश्वरान्निपाता: तत्र अधिरीश्वरे (१-४-९७) इति सूत्रात् प्राक्निपाता इत्याधिक्रियते । "ईश्वर" इति पदमादाय पञ्चमी विभक्त्यन्तत्वेन आपाद्य चाधिकारो योजित: । एवं २-१-३, ४-१-७५, ४-१-८५, ५-१-१, ५-१-१८, ५-१-१, ५-३-७ इति सूत्रेषु प्राक्पदेन विधानं साधितम् । प्राक्पदमनुपयुज्य प्राय: नवसंख्येषु सूत्रेषु पञ्चम्यन्तताविधानमिष्टम्, निरवधिकनिर्द्देश: अत्रन्यं वैचित्र्यम् । केवलं पञ्चम्यन्तघटिताधिकारसूत्रेषु दिगयोगलक्षणा पञ्चमीविहिता वर्त्तते । अन्यत्र अधिकारसूत्रेषु (४-१-१४), ५-१-७८) अर्थप्रतिपादनपुरस्सरं निर्द्देश: दृश्यते । कुत्र पुन: नूतनस्य अध्यायस्यारम्भ: यथा "धातो:" इति । तृतीयाध्यायपरिसमाप्तिं यावत् कुत्राचित् विषयान्तारस्यारभ्य: यथा कालात् (५-१-७८)। एताद्विधस्याधिकारस्यावधिनिरूपणे विषयान्त प्रवेशानिर्द्देशनभावम् । पुनश्च पञ्चम्यान्तपदम्+ तदितरविभक्त्यन्तपदमादाय अधिकारसूत्राणि आकडारादेका संज्ञा (१-४-१) असिद्धवदत्राभात् (६-४-२२) इत्यादीनि । दिगयोगलक्षणा पञ्चमीतिविचार: ।

**अधिकारसूत्रेषु षष्ठीविभक्ति: –**

पञ्चदशसूत्राणि (१५) एवं विधानि वर्त्तन्ते । तत्र केवलं षष्ठयन्तपदघटिताधिकार-सूत्राणि अष्टौ वर्त्तन्ते । (३-४-७७, ६-१-२, ६-१-१५९, ६-४-, ६-४-१२९, ७-२-९७, ७-३-१, ८-११६), लस्य भस्य अंगस्य, पदस्य, मपर्यन्तस्य इत्यादीनि, एतेषु या षष्ठी विभक्ति: सा सम्बन्धसामान्या षष्ठी इति । विशेषतया – कारकषष्ठी, सम्बन्धषष्ठी उपपदषष्ठी चेति भावेन षष्ठी विभक्ति: त्रिभि: प्रकारै: निष्पद्यते । एषु सम्बन्धषष्ठी एकोनशतं षष्ठयर्था इति भाष्याभिप्रायात् कुत्रकतम: अर्थो निर्णीत: तत्

सर्वथा व्यख्यानमपेक्षते। काशिकायां सम्बन्ध – सामान्यभूताषष्ठी इति व्याख्यातं विद्यते । तथाहि अंगस्येति सम्बन्धसामान्ये एषा षष्ठी यथायोगं विशेषेषु अवतिष्ठते । पदमञ्जर्यां न्यासे च तदेव व्याख्यातम् । षष्ठयन्तपदं + तद्धितविभक्त्यन्तं पदम् – एतद् विधानि अधिकारसूत्राणि सप्तसंख्यकानि वर्त्तन्ते । यथा – ४-१-९२, ४-३-१२०, ६-१-१, ६-१-८४, ८-१-१, ८-२-८२, ८-३-५५ 'तस्यापत्यं' 'तस्येदम्' एका: 'पूर्वपरयो: अपदान्तस्य मुर्धन्य:' इत्यादीनि । अत्रापि सम्बन्ध सामान्याभूताषष्ठी। किन्तु कुत्र स्थानषष्ठी, कुत्र अवयवषष्ठी इत्यादि भावेन व्युत्पादित: दृश्यते ।

**अधिकारसूत्रेषु सप्तमी विभक्ति: –**

सप्तम्यन्तपदेनाधिकारसूत्राणां संख्या दश:, अर्थद्योतनाय एषोऽधिकारो व्यवस्थापित: । तद्यया – "स्त्रियाम्" "भूते" "संहितायाम्" "अनभिहिते" इति। "कारके" इत्यत्र या सप्तमी तत्र संज्ञाधिकारत्वेन तस्य विवेचनात् नागेशेन सौत्रसप्तमीति व्युत्पादितम् । "आर्धधातुके" (२-४-३५) "संहितायाम्" (६-१-७२) इति या सप्तमी सा प्रक्रियाप्रतिपादनाय वैषयिकसप्तमीति बोधनीयम्।

अष्टाध्याय्यामधिकारसूत्रं सूत्रात्मकस्य पाणिनीयव्याकरणस्य संक्षिप्तानुशीलनोद्देश्येन उपनिबद्धम् । अन्यथा प्रतियोगमुपस्थापनार्थं प्रैक्तमेकं पदमनेकवारं समुच्चरितं स्यात् । अत: रूपविज्ञानदृष्टया अर्थविज्ञानदृष्टयाच लाघवं समाहतं पुनश्च ध्वनिविज्ञानवैचित्र्यात् सकृदुच्चारितं पदमनेकार्थं प्रतिपादयतीतिधिया लाघवमुपपद्यत एव । अष्टाध्याया: निर्माणात् प्राक् अनल्पमति: आचार्य्य: दिव्यदृष्ट्या तस्या: स्वरूपकल्पनं वाक्यविज्ञानदृष्ट्या निर्द्धारितवान् इति अधिकारसूत्राणां परिचर्य्यया प्रतिपद्यते ।

*शोधच्छात्र:*

# सिद्धान्तकौमुदीदिशा अनुपसर्जनादिति सूत्रार्थविचार :(४.१.१४)

*सुस्मन्तकुमारद्विवेदी*

षड्विधेषु सूत्रेष्वधिकारलिङ्गबोधकत्वमिदं सूत्रम् । अधिकारत्वं नाम स्वस्थले वाक्यार्थबोधजनने सति स्वानन्तरविध्युपकारकत्वमुताहो उत्तरोत्तरगमनम् अधिकार:, अधिक: कारोऽधिकारो वा[१] । अनुपर्जनन्तु प्रधानेतराभावकत्वमिति । अर्थात् प्रधानार्थे विधिजनकत्वमिति । सूत्रस्यास्य यूनस्ति:[२] इत्येतत्सूत्रपर्यन्तमधिकार: । प्रधानेऽर्थे टाबादिस्त्रीप्रत्यया: विधीयन्ते इति सूत्रार्थ: । तेन च कुरुषु चरति इत्यस्मिन्नर्थे कुरूपपदात् चर्धातो: चरेष्ट[३] इति सूत्रेण टप्रत्यये टित्त्वात् टिड्ढाणञिति[४] सूत्रेण ङीप् प्रत्यये कुरुचरी इति रूपमिदं सिध्यति । किञ्च बहव: कुरुचरा: यस्यां नगर्यामित्यस्मिन्नर्थे बहुकुरुचर इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां टित्त्वात् ङीप्रत्ययविधीयमाने सति गौणार्थकत्वात् प्रकृतसूत्रेण ङीप्रत्यय: निषिध्यते । तेन च अजाद्यतष्टाबिति[५] सूत्रेण टापि बहुकुरुचरेति रूपमिदं निर्वर्त्तते । पुनश्च नदट्शब्दात् स्त्रीत्वविवक्षायां टित्त्वात् ङीप्रत्यये नदी इति रूपमिदं सिध्यति । तर्हि बहुनद इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप्रत्यये प्राप्ते सति प्रकृतसूत्रेण उपसर्जनात् ङीप्रत्ययो न प्रवर्तत‍ते । किञ्च टापि बहुनदा इति रूपमिदं सिध्यति । एवमेव अतिनदा , सर्वनदा इत्यादीनि रूपाणि सिध्यन्ति । अत: तदन्तविधिस्थलेऽनेन सूत्रेण तत्तत्प्रत्ययविधित्वं निषिध्यतयिति। परन्तु समासप्रत्ययविधौ प्रतिषेध: इति तदन्तविधिनिषेधकवार्तिकेणैव सिद्धे किमर्थसूत्रमिदं भणितमिति । तेन अनुपर्जनादिति सूत्रमिदं व्यर्थयते । व्यर्थं सज्ज्ञापयति अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीति । तेन धीवन् इत्यस्मात् वन्नन्तात् प्रातिपदिकात् वनो र च[६] इति सूत्रेण ङीप्रत्यये नकारस्य रेफादेशे यथा धीवरी इति रूपमिदं सिध्यति । तथैव धीवन्तमतिक्रान्तमित्यस्मिन्नर्थे अतिधीवन् इत्यस्मात् प्रातिपदिकात् स्त्रीत्वविवक्षायामपि तदन्तविधिज्ञापकत्वेनैव ङीप्रत्यये सति अतिधीवरी इति रूपमिदं सिध्यति ।

स्त्रीप्रत्ययविधाने सत्यपि नद इव आचरति इत्यस्मिन्नर्थे नद इत्यस्मात् आचारर्थे सर्वप्रातिपदिकेभ्य: क्विप्वक्तव्य: इति नियमानुसारेण क्विप्रत्यये सर्वापहारलोपे नद इत्यस्मात् स्त्रीत्वविवक्षायां ङीम्मा भवत्विति निषेधाय सूत्रमिदमावश्यकमिति । किञ्च अनुपर्जनादिति[७] सूत्रस्य सार्थके कथं वा तदन्तविधिज्ञापकत्वमिति प्रश्ने सति अनुपर्जनादिति सूत्रे स्त्रीप्रत्यये तदन्तविधिज्ञापकत्वमिति भाष्योक्तप्रमाणमङ्गीक्रियते ।

एतदेव लघुशब्देन्दुशेखरे प्रोक्तं यत् — आचारक्विबन्तप्रकृतिककर्तृक्विबन्तानामनभिधानमेव स्त्रियाम् एतद्भाष्यप्रमाणम्[८] । अर्थात् पूर्वपक्षी यदुपस्थापितं नदेत्यादौ आचारक्विन्तपक्षे सूत्रमिदं ज्ञापकमिति तन्न इति भाष्यकारेण स्त्रियामिति सूत्रे निगदितमस्ति ।

ननु पञ्च गाव: धनं यस्येत्यस्मिन्नर्थे गोशब्दात् टित्त्वात् अवयवेऽचरितार्था अनुबन्धा: समुदायस्योपकारका भवन्ति इति न्यायेन समुदायोऽयं टित्त्वात् टिड्ढाणञिति सूत्रेण उताहो द्विगोरिति सूत्रेण ङीप्रत्ययो न विधीयते

इति एतज्ज्ञापकमित्युक्तौ न, पञ्चगवधन इत्यत्र तु प्रातिपदिकत्वस्यैव न प्रसक्तिरर्थात् एतत् संज्ञाफलभूतविभक्तीतरसमभिव्याहारनपेक्षया लोके अर्थविषयकबोधजनकत्वमिति[९] यल्लक्षणं तन्न प्रसज्येत । अर्थात् एतत्संज्ञाफलभूता या विभक्ति: सुबादिविभक्ति: तदितरसमभिव्यारस्य अपेक्षा धनेन सह वर्तते इति कृत्वा लक्षणिदं न प्राप्नोति किञ्च सूत्रमिदं व्यर्थमति ।

पुनरपि तथैव आपिशलिना प्रोक्तमधीते वेत्यस्मिन्नर्थे आपिशला ब्राह्मणीत्यत्र तु ङीप् न भवति । अर्थात् प्रोक्तमित्यत्र अन्तर्गताणमाधारीकृत्य ङीप्प्रत्ययो विधीयते । किन्तु तदन्तत्वात् अनेन सूत्रेण निषिध्यते इत्युक्तो न । तेन चास्य शास्त्रस्य प्रापकत्वमिति चेन्न, अर्थात् वर्णाश्रये नास्ति प्रत्ययलक्षणमिति परिभाषया नास्य प्रत्ययस्य लक्षणत्वमिति । वस्तुत: अनुपसर्जनाधिकार: व्यर्थ: सन् स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयतीत्युक्तम् । अत एव वनोर च इति सूत्रविहितौ ङीब्रेफौ वन्नन्ते धीवन् शब्दे इव धीवन्तमतिक्रान्तेत्यर्थे वन्नन्तान्ते अतिधीवन्नित्यत्रापि प्रवृत्या धीवरी इतिवत् अतिधीवरीत्यादिकं सिध्यति । अत: आपिशला ब्राह्मणीत्यत्र ङीब्वारणमप्यत्र प्रयोजनम् । अनुपसर्जनादिति सामर्थ्याद् गृह्यमाणविशेषणम् । अन्यथा ज्ञापनोत्तरमपि स्वांशे चरितार्थ्याभावाद्वैयार्थापत्ति: । तत्र अण्णन्तादे: प्रातिपदिकविशेषणत्वेनाण्णन्तात् इत्येवं रूपमित्यर्थ: । कुम्भकारेयादिति सिद्धिरिति उच्यते । अर्थात् अण: प्रत्ययत्वेन प्रत्ययग्रहणपरिभाषया तदन्तग्रहणेऽण्णन्तमित्यर्थे लभ्यते । तच्चाधिकतस्य प्रातिपदिकस्य विशेषणम् । तेन द्वितीयस्तदन्तविधि: लभ्यते । तथा च अण्णन्तादन्ताच्च ङीबित्यादिरीत्याऽर्थो वर्णनीय: । अनया रीत्याऽनुपसर्जनाधिकारेण स्त्रीप्रत्ययेषु तदन्तव विधि: ज्ञाप्यते । अन्यथा ज्ञापकत्वाभावे समासप्रत्ययविधौ प्रतिषेध: इति निषेधस्य सत्वादन्तविधिर्न स्यादेव । एवं स्थिते प्रत्ययग्रहणं परिभाषया लब्धस्य तदन्तविधेस्तु समासप्रत्ययविधौ प्रतिषेध: इति निषेध: न प्रवर्तते । अत्रापि यदि निषेधस्तहि प्रातिपदिकात् इत्यनेन सहान्वयो न स्यादिति । स्त्रीप्रत्ययेषु तदन्तव धिरत्राङ्गीकारादेव कौम्भकारेय इति रूपं सिध्यति । तथा हि कुम्भं करोतीत्यर्थे कुम्भेत्युपपदपूर्वकात् डुकृञ्करणे इति धातो: कर्मण्यण् इति सूत्रेणाण्प्रत्यये अचो ञ्णिति इति ऋकारस्य वृद्धौ आकारे रपरत्वे च कुम्भकार इति जाते: तत: अपत्यार्थे स्त्रीभ्यो ढक्[१०] इति ढकि ककारस्येत्वे किति च इत्यादिवृद्धौ औकारे , आयनेयीनीयिय: फढखछघां प्रत्ययादीनाम् इति सूत्रेण ढस्य एयादेशे यस्येति च इति ईकारलोपे कौम्भकारेय इति अभीष्टं रूपं सिध्यति । अत्र अण्णन्त: कारशब्द: । अण्णन्तात: कुम्भकारशब्द: ततो ङीपि ढकि चेदं सिध्यति । द्वितीयतदन्तग्रहणाभावे प्रत्ययग्रहणपरिभाषया कारशब्दस्यैवाण्णन्तत्वेन ततो ङीपि स्त्रीप्रत्यये चानुपसर्जने न इति तदादिनियमभावेन विशिष्टस्यापि स्त्रीप्रत्यान्तत्वात् ततो ढक् प्रत्यये अभीष्टस्यापि कारी इत्यस्यापि स्त्रीप्रत्ययान्तात् कदाचित् । ततोऽपि ढकि तन्निरूपिताङ्गस्य विशिष्टेऽभावेन उकारस्य आदिवृद्ध्याभावे कुम्भकारेय इत्यनिष्टं रूपं स्यादिति । एवं क्रमेण सूत्रस्यास्य वैयर्थ्यं प्रतितौ स्त्रीप्रत्यये तदन्तविधिं ज्ञापयतीति राधान्तो प्रस्तुत: ।

**पादटिप्पण्य:-**

१.म.भा.पृ.सं-११२
२.पा.अ.सू.सं-४.१.७७
३.पा.अ.सू.सं-३.२.१६
४. पा.अ.सू.सं-४.१.१५
५. पा.अ.सू.सं-४.१.४
६. पा.अ.सू.सं-४.१.७
७. पा.अ.सू.सं-४.१.१४
८.पा.अ.सू.सं-ल.श.शे.पृ.सं-१५२
९.पा.अ.सू.सं-१.२.४५ल.श.शे
१०.पा.अ.सू.सं-४.१.१२०

*विद्यावारिधिच्छात्र:(व्याकरणविभाग:)*

*श्रीसदाशिवपरिसर:, पुरी*